CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Part. III
Adhikaraṇas 8-15

64/B/C

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

येयुः—'भर्तारं नः प्रसादय' इति। स यं दूतं प्रेषयेत्, तमुपालभेत—'भर्ता ते माममात्यैर्भेदयति; न च पुनरिहागन्तव्यम्' इति। अथैकममात्यं निष्पातयेत्; स परमाश्रित्य योगापसर्पापरक्तदूष्यानशक्तिमतः स्तेनाटविकानुभयोपघातकान् वा परस्योपहरेत्। आप्तभावोपगतः प्रवीरपुरुषोपघातमस्योपहरेत्। अन्तपालमाटविकं दण्डचारिणं वा—'दृढमसौ चासौ च ते शत्रुणा सन्धत्त' इति। अथ पश्चादभित्यक्तशासनैरेनान् घातयेत्।

दण्डबलव्यवहारेण वा शत्रुमुद्योज्य घातयेत्।

विजिगीषुः। ते इति। अमात्याः, तच्छत्रोः मित्रीकृतस्य शत्रोः, प्रेषयेयुः, अर्थाद् दूतम्। दूतनिवेदनीयं सन्देशमाह—भर्तारं न इति। अस्मासु कुपितमिति शेषः, प्रसादय इति सन्दिश्येति शेषः। स इति। अमात्यप्रार्थितः शत्रुः, यं दूतं, प्रेषयेद् विजिगीषुप्रसादनार्थं, तम्, उपालभेत निन्देत्, अर्थाद् विजिगीषुः, किमुक्त्वा, 'भर्ता ते माम् अमात्यैः भेदयति, पुनः, इह मदन्तिके, नचागन्तव्यम्, अर्थाद् भर्तृसन्देशहरेण त्वया' इति। अमात्यभेदनस्य सत्यत्वभ्रमजननानुकूलमाह—अथेति। अनन्तरम्, एकमवक्षिप्तेष्वन्यतमम्, अमात्यं, निष्पातयेत् स्वान्तिकान्निरस्तं कुर्यात्। स इति। निष्पातितः, परम् आश्रित्य, योगापसर्पापरक्तदूष्यान् स्वामिप्रणिहितान् कपटापसर्पान् स्वामिन्यपरागं प्राप्तान् स्वामिदूष्यांश्च, अशक्तिमतः, स्तेनाटविकान्, उभयोपघातकान् वा, परस्य उपहरेद् 'इमे तव सहाया मया सम्पादिता' इति वदन् उपनयेत्। आप्तभावोपगतः प्रत्ययितत्वापन्नः, अस्य शत्रोः, प्रवीरपुरुषोपघातं प्रवीरपुरुषनाशम्, उपहरेत् प्रापयेत्। कथमुपहरेदित्याह—अन्तपालमिति। तम्, आटविकम् अटवीपालं, दण्डचारिणं वा सैनिकं वा, दुष्टत्वेन सूचयेदित्यध्याहर्तव्यम्। किमुक्त्वा, दृढम् असौ च असौ च अन्तपालादिः, ते शत्रुणा, सन्धत्ते, इति उक्त्वेति शेषः। अथेति। किञ्च, पश्चाद् उत्तरकाले, अभित्यक्तशासनैः अभित्यक्तो विजिगीषुवध्यः तद्धस्तार्पितैर्विजिगीष्वन्तपालादिपरस्परमैत्रीप्रकाशकैः कूटलेख्यैः करणभूतैः, एनान् घातयेत् कूटलेख्यान्यभित्यक्तहस्तात् परेण ग्राहयित्वा अन्तपालादीन् हतान् कारयेदित्यर्थः।

दण्डबलं ते दास्यामीति प्रतिज्ञया परं तच्छत्रुणाभियोज्य पश्चात् तत्प्रदानेन तं शत्रुबलेन घातयेदित्याह—दण्डबलव्यवहारेण वेत्यादि।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कृत्यपक्षोपग्रहेण वा परस्यामित्रं राजानमात्मन्यपकारयित्वाभियुञ्जीत । ततः परस्य प्रेषयेद् — 'असौ ते वैरी ममापकरोति; तमेहि सम्भूय हनिष्यावः; भूमौ हिरण्ये वा ते परिग्रहः' इति । प्रतिपन्नमभिसत्कृत्यागतमवस्कन्देन प्रकाशयुद्धेन वा शत्रुणा घातयेत् । अभिविश्वासनार्थं भूमिदानपुत्राभिषेकरक्षापदेशेन वा ग्राहयेत् । अविषह्यमुपांशुदण्डेन वा घातयेत् । स चेद् दण्डं दद्यात् न स्वयमागच्छेत्, तमस्य वैरिणा घातयेत् । दण्डेन वा प्रयातुमिच्छेत् न विजिगीषुणा, तथाप्येनमुभयतस्संपीडनेन घातयेत् । अविश्वस्तो वा प्रत्येकशो यातुमिच्छेद्, राज्यैकदेशं वा यातव्यस्य आदातुकामः, तथाप्येनं वैरिणा सर्वसन्दोहेन वा घातयेत् । वैरिणा वा सक्तस्य दण्डोपनयेन मूलमन्यतो हारयेत् ।

कृत्यपक्षोपग्रहेण वेति । कृत्यपक्षाणां क्रुद्धलुब्धभीतादीनां परकीयानां स्वानुकूलीकरणेन, परस्य, अमित्रं राजानम्, आत्मनि अपकारयित्वा अपकारं कारयित्वा, अभियुञ्जीत । ततः पश्चात्, परस्य प्रेषयेद् अर्थात् सन्देशं, कथम्भूतं सन्देशम्, 'असौ ते वैरी ममापकरोति, तमेहि सम्भूय हनिष्यावः, भूमौ हिरण्ये वा अर्थाच्छत्रुजयलभ्ये लाभे, ते परिग्रहः संविभागः' इत्येवंलक्षणम् । प्रतिपन्नम्, अभिसत्कृत्य स्वोक्तिमभिपूज्य, आगतं परम्, अवस्कन्देन सौप्तिकेन, प्रकाशयुद्धेन वा, शत्रुणा, घातयेत् । अथ शत्रुः संभूयाभियुक्तो जितः, तदा किं कर्तव्यमित्याह— अभिविश्वासनार्थमिति । विश्वासं जनयितुं, भूमिदानपुत्राभिषेकरक्षापदेशेन वा प्रतिश्रुतभूमिदानमपदिश्य स्वपुत्राभिषेकमपदिश्य स्वरक्षामपदिश्य वा, ग्राहयेद् अर्थात् परम् । अविषह्यम् अपदेशेन ग्रहीतुमशक्यम्, उपांशुदण्डेन वा रहोवधेन वा, घातयेत् । अभिसत्कृत्यागतविषया एते विधयः । परश्चेत् स्वयं नागतः दण्डमेव केवलं साहाय्यार्थं प्रेषयेत्, तदा परस्य तं दण्डं तच्छत्रुणा घातयेदित्याह — स चेद् दण्डमित्यादि । यदि सम्भूय हननार्थमाहूतः परः स्वीयेन दण्डेनैव सह प्रयातुमिच्छति ननु विजिगीषुणा सह, तदैनं पुरस्तात् पृष्ठतश्च संपीडनेन घातयेदित्याह — दण्डेन वा प्रयातुमिच्छेदित्यादि । यद्यविश्वासादसंप्रयुज्यैव विजिगीषुणा परः स्वयं पृथग् यातुमिच्छति राज्यैकदेशं च यातव्यस्य स्वयं ग्रहीतुकामः, तदा तं वैरिणा सर्वसैन्यसमुदयेन वा घातयेदित्याह — अविश्वस्तो वेत्यादि । वैरिणा वा सक्तस्येति । वैरिणमभिगम्य तेन सह युद्ध

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शत्रुभूम्या वा मित्रं पणेत; मित्रभूम्या वा शत्रुम् । ततः शत्रुभूमिलिप्सायां मित्रेणात्मन्यपकारयित्वाभियुञ्जीत । इति समानाः पूर्वेण सर्व एव योगाः ।

शत्रुं वा मित्रभूमिलिप्सायां प्रतिपन्नं दण्डेनानुगृह्णीयात्; ततो मित्रगतमतिसन्दध्यात्; कृतप्रतिविधानो वा व्यसनमात्मनो दर्शयित्वा मित्रेणामित्रमुत्साहयित्वा आत्मानमभियोजयेत्; ततः संपीडनेन घातयेत्; जीवग्राहेण वा राज्यविनिमयं कारयेत् । मित्रेणाहूतश्चेच्छत्रुरग्राह्ये स्थातुमिच्छेत्, सामन्तादिभिर्मूलमस्य हारयेत्; दण्डेन वा त्रातुमिच्छेत्, तमस्य घातयेत् ।

व्यासङ्गं कुर्वतः परस्य, मूलं स्थानीयं, दण्डोपनयेन सैन्यप्रेषणेन, अन्यतः अन्यत्र, हारयेत् ।

शत्रुभूम्या वेति । मित्रं, शत्रुभूम्या स्वशत्रुभूम्या, पणेत 'तां जित्वा ते संविभजामी'ति संविदं कुर्याद् गूढम् । मित्रभूम्या वा, शत्रुं पणेत । तत इति । तत्र, शत्रुभूमिलिप्सायां, मित्रेण, आत्मनि, अपकारयित्वा अपकारं कारयित्वा, अभियुञ्जीत, अर्थात् तम् । इति समानाः पूर्वेण सर्व एव योगा इति । "ततः परस्य प्रेषयेद् 'असौ ते वैरी ममापकरोति, तमेहि संभूय हनिष्यावः भूमौ हिरण्ये वा ते परिग्रहः' इति प्रतिपन्नमभिसत्कृत्यागतमवस्कन्देन प्रकाशयुद्धेन वा शत्रुणा घातयेद्" इत्यादिना "वैरिणा वा सक्तस्य दण्डोपनयेन मूलमन्यतो हारयेद्" इत्यन्तेन सन्दर्भेण ये पूर्वं योगा उक्ताः ते सर्वे इहापि योज्या इत्यतिदेशार्थः ।

शत्रुं वेति । तं, मित्रभूमिलिप्सायां, प्रतिपन्नं संभूयहननाभ्युपगन्तारं, दण्डेन स्वसैन्यदानेन, अनुगृह्णीयात् । ततः स्वदत्तसैन्यग्रहणानन्तरं, मित्रगतं मित्रप्राप्तं मित्रे कृताभियोगम्, अतिसन्दध्यात् मित्रेण संभूय घातयेत् । आत्मनो व्यसनस्याविद्यमानस्यैव तत्प्रतिविधानारम्भैर्विद्यमानताभिनयेन शत्रुं स्वमित्रद्वारेण प्रोत्साह्यात्मन्यभियोजयेत्; ततः स्वात्मना मित्रेण चेत्युभाभ्यां कृतेन पीडनेन तं घातयेद्, जीवन्तमेव वा तं गृहीत्वा राज्यपरिवर्तं कारयेद् विजिगीषुरित्याह — कृतप्रतिविधान इत्यादि । इह 'कृतप्रतिविधानो वे'त्यस्य स्थाने 'ततः प्रतिविधानेन वा' इति क्वचित् पाठः समानार्थः । मित्रेणेति । तेन, आहूतः आत्मसंप्रयोगायार्थितः, शत्रुः विजिगीषुव्यसनाभिनयजनितोत्साहो वैरी, अग्राह्ये स्थातुमिच्छेच्चेद् विजिगीषुनियुक्तानामपि तन्मित्रास

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तौ चेन्न भिद्येयातां प्रकाशमेवान्योन्यस्य भूम्या पणेत; ततः परस्परं मित्रव्यञ्जनोभयवेतना वा दूतान् प्रेषयेयुः—'अयं ते राजा भूमिं लिप्सते शत्रुसंहितः' इति; तयोरन्यतरो जाताशङ्कारोषः पूर्ववच्चेष्टेत ।

दुर्गराष्ट्रदण्डमुख्यान् वा कृत्यपक्षहेतुभिरभिविख्याप्य प्रव्राजयेत्; ते युद्धावस्कन्दावरोधव्यसनेषु शत्रुमतिसन्दध्युः; भेदं वास्य स्ववर्गेभ्यः कुर्युः; अभित्यक्तशासनैः प्रतिसमानयेयुः ।

लुब्धकव्यञ्जना वा मांसविक्रयेण द्वास्स्था दौवारिकापाश्रयाश्चोराभ्यागमं परस्य द्विस्त्रिरिति निवेद्य लब्धप्रत्यया भर्तुरनीकं द्विधा

भ्प्रयुक्ततयैव स्थातुमिच्छेद् यदि, तर्हीति शेषः, सामन्तादिभिः, अस्य शत्रोः मूलं स्थानीयं, हारयेत् । दण्डेन वा त्रातुमिच्छेदिति । सैन्येन रक्षितुमिच्छेचेत्, तं दण्डम्, अस्य, घातयेत् ।

मित्रशत्र्वोर्गूढभेद्यत्वेऽतिसन्धानप्रकारमभिधायाभेद्यत्वे तमाह — **तौ चेन्न भिद्येयातामित्यादि** । प्रकाशमेव अगूढमेव सर्वजनविदितं यथा स्यात् तथा । अन्योन्यस्य भूम्या पणेत मित्रभूम्या शत्रुं शत्रुभूम्या मित्रं च पणेत । अन्योन्यभूम्येत्यपि पाठः । तत इति । प्रकाशपणनानन्तरं, परस्परं शत्रुं मित्रं चोद्दिश्येत्यर्थः, मित्रव्यञ्जनोभयवेतना वा मित्रव्यञ्जना उभयवेतना वा, व्यस्त एव तु पाठो हृद्यः । दूतान् सन्देशहरान्, प्रेषयेयुः । सन्देशप्रकारमाह — **अयं ते राजेत्यादि** । तयोरिति । मित्रशत्र्वोः, अन्यतरः, जाताशङ्कारोषः, पूर्ववत् चेष्टेत पूर्वोक्तदिशा स्ववैरिणमतिसन्दध्यादित्यर्थः ।

योगान्तरमाह — **दुर्गराष्ट्रदण्डमुख्यान् वेति** । स्थानीयमुख्यान् जनपदमुख्यान् सेनामुख्यांश्च, कृत्यपक्षहेतुभिः कृत्यसहायत्वसंभावनानिमित्तैः, अभिविख्याप्य, प्रव्राजयेद् राष्ट्राद् विवासयेत् । ते विवासिताः, शत्रुमाश्रिता इति शेषः, युद्धावस्कन्दावरोधव्यसनेषु युद्धाद्यवसरेषु, शत्रुम् अतिसन्दध्युः, भेदं वा, अस्य शत्रोः, स्ववर्गेभ्यः स्वीयेभ्योऽमात्यादिवर्गेभ्यः, कुर्युः । अभित्यक्तशासनैः अभित्यक्तहारितैः कूटलेख्यैः, प्रतिसमानयेयुः स्वोद्भावितान् मिथ्यार्थान् संवादयेयुः ।

योगान्तरमाह — **लुब्धकव्यञ्जना वेति** । मृगयुवेषा गूढपुरुषाः, मांसविक्रयेण तद्व्यापारवशेन, द्वाःस्थाः द्वारस्थिताः, दौवारिकापाश्रयाः द्वारा-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

निवेश्य ग्रामवधेऽवस्कन्दे च द्विषतो ब्रूयुः— 'आसन्नश्चोरगणः, महांश्चाक्रन्दः, प्रभूतं सैन्यमागच्छतु' इति। तदर्पयित्वा ग्रामघातदण्डस्य सैन्यमितरदादाय रात्रौ दुर्गद्वारेषु ब्रूयुः— 'हतश्चोरगणः; सिद्धयात्रमिदं सैन्यमागतं; द्वारमपाव्रियताम्' इति। पूर्वप्रणिहिता वा द्वाराणि दद्युः; तैः सह प्रहरेयुः।

कारुशिल्पिपाषण्डकुशीलववैदेहकव्यञ्जनानायुधीयान् वा परदुर्गं प्रणिदध्यात्। तेषां गृहपतिकव्यञ्जनाः काष्ठतृणधान्यपण्यशकटैः प्रहरणावरणान्यभिहरेयुः; देवध्वजप्रतिमाभिर्वा। ततस्तद्व्यञ्जनाः प्रम-

---

धिकृताश्रयाः, चोराभ्यागमं, परस्य, द्विस्त्रिरिति द्वित्रादिवारान्, निवेद्य, लब्धप्रत्ययाः भर्तुः आप्तभर्तृविश्वासाः, ग्रामवधे अवस्कन्दे च विषये तदुभयप्रतिकारार्थमित्यर्थः, द्विषतः शत्रोः, अनीकं, द्विधा निवेश्य द्वैराश्येन निविष्टं कारयित्वा, ब्रूयुः। किमिति — 'आसन्नः चोरगणः, महांश्च, आक्रन्दः जनाक्रोशः, प्रभूतं बहुलं, सैन्यम् आगच्छतु, चोरगणाभिघातार्थम्' इति। तदिति। आगतं सैन्यं, ग्रामघातदण्डस्य ग्रामघातप्रतिकारार्थे इत्यर्थः, अर्पयित्वा, इतरत् सैन्यम् आदाय, रात्रौ दुर्गद्वारेषु ब्रूयुः, गत्वा वदेयुः, किमिति — 'हतः चोरगणः, अत एव सिद्धयात्रं सफलयात्रम्, इदं सैन्यम् आगतम्। द्वारम् अर्थाद् दुर्गस्य, अपाव्रियतां भयहेतुव्यपगमाद् विवृतं क्रियताम्' इति। द्वारापावरणप्रार्थनं च सैन्यं परस्य स्ववशगतं हत्वा गमिष्यतां सुखनिर्गमार्थम्। पूर्वप्रणिहिता वेति। पूर्वनियुक्ता वा गूढपुरुषाः, द्वाराणि दद्युः। न केवलं द्वारदाने सहाया एते पूर्वप्रणिहिताः किन्तु लुब्धकव्यञ्जनैः क्रियमाणे सैन्यस्य प्रहारेऽपीत्यभिप्रायेणाह — तैः सह प्रहरेयुरिति।

योगान्तरमाह — कारुशिल्पीत्यादि। आयुधीयान् आयुधजीविनः। अनायुधीयान् इत्यसमञ्जसः पाठः। प्रणिदध्यात् अपसर्पयेत्। तेषामित्यादि। तेषां कार्वादिव्यञ्जनानामायुधीयानाम्। प्रहरणावरणानि प्रहरणानि आवरणानि च युद्धोपयोगीनि। अभिहरेयुः गूढं दद्युः। देवध्वजप्रतिमाभिर्वा देवानां ध्वजभूतैः खड्गादिभिः प्रतिमाभिश्च सह वा। ततस्तद्व्यञ्जना इत्यादि। ततः कार्वादिव्यञ्जनाः गृहपतिकव्यञ्जनसकाशाधिगतप्रहरणावरणाः, प्रमत्तवधं प्रमादिनां हननम्, अवस्कन्दप्रतिग्रहं हठाक्रमणस्वीकारम्, अभिप्रहरणम्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

त्तवधमवस्कन्दप्रतिग्रहमभिप्रहरणं पृष्ठतः शङ्खदुन्दुभिशब्देन वा प्रविष्टमित्यावेदयेयुः । प्राकारद्वाराट्टालकदानमनीकभेदं घातं वा कुर्युः ।

सार्थगणवासिभिरातिवाहिकैः कन्यावाहिकैरश्वपण्यव्यवहारिभिरुपकरणहारकैर्धान्यक्रेतृविक्रेतृभिर्वा प्रव्रजितलिङ्गिभिर्दूतैश्च दण्डातिनयनं सन्धिकर्म विश्वासनार्थम् । इति राजापसर्पाः ।

एत एवाटवीनामपसर्पाः कण्टकशोधनोक्ताश्च । व्रजमटव्यासन्नमपसर्पाः सार्थं वा चोरैर्घातयेयुः । कृतसङ्केतमन्नपानं चात्र मदनरसविद्धं वा कृत्वापगच्छेयुः । गोपालकवैदेहकाश्च ततश्चोरान् गृहीत

अभितः प्रहारदानं च, शङ्खदुन्दुभिशब्देन वा, वाशब्दात् प्रकारान्तरेण वा, **पृष्ठतः प्रविष्टमिति** पृष्ठत उपस्थितमिति — प्रमत्तवधोऽवस्कन्दप्रतिग्रहोऽभिप्रहरणं चेति त्रयं पृष्ठत उपस्थितमितीत्यर्थः, आवेदयेयुः, अर्थात् परदुर्गस्थान् । आवेदनवशाच्च संकुले प्रवृत्ते प्राकारद्वाराट्टालकखण्डनं पूर्ववत् परानीकस्य द्विधा भेदनं तद्घातं च कुर्युरित्याह — **प्राकारद्वारेत्यादि** ।

घाताय परानीकस्य भेदनवद् अतिनयनमपि अपसर्पैः कार्यमित्याह — **सार्थेत्यादि** । सार्थगणवासित्वादीनि षड् रूपाणि परिगृह्य स्वमार्गातिवाहनसहायापदेशेन परसैन्यस्यातिदूरनयनमपसर्पैः कर्तव्यं, सन्धिपणितं कर्म च परविश्वासनार्थं कर्तव्यमिति वाक्यार्थः । तत्र सार्थगणवासिभिः धनिकगणान्तर्भूतैः । आतिवाहिकैः अतिवाहो दुर्गममार्गलङ्घनं तत्प्रयोजनैर्मार्गरक्षार्थिभिरित्यर्थः, इदं च षण्णां विशेषकम् । कन्यावाहिकैः कन्यां वहन्ति नयन्तीति कन्यावाहिकास्तैः । प्रव्रजितलिङ्गिभिः संन्यासिव्यञ्जनैः । शेषं स्पष्टार्थम् । **इति राजापसर्पा इति** । अनेन प्रकारेण राज्ञामपसर्पा विज्ञेयाः ।

य एते राजापसर्पाः ये च कण्टकशोधनोक्ताः, त उभये आटविकानां प्रणिधेया इत्याह — **एत एवेत्यादि** । आटविकेष्वपसर्पकार्यमाह — **व्रजमिति** । गोष्ठम्, अटव्यासन्नं वनसन्निकृष्टम्, अपसर्पाः, सार्थं वा पथिकवृन्दं वा, चोरैः अर्थादाटविकैः, आटविका हि चोरवृत्तय इति । घातयेयुः, तेषु स्वयमनुप्रविष्टा इत्यार्थम् । **कृतसङ्केतमिति** । अमुकदेशकाले युष्माकमाहारसंविधा भविष्यतीति कृतसमयम्, अन्नपानं च, अत्र, मदनरसविद्धं मदकरद्रव्येण विषेण च युक्तं, कृत्वा, अपगच्छेयुः । **गोपालकवैदेहकाश्च**, राज-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

लोप्त्रभाराः मदनरसविकारकालेऽवस्कन्दयेयुः । सङ्कर्षणदैवतीयो वा मुण्डजटिलव्यञ्जनः प्रहवणकर्मणा मदनरसयोगाभ्यामतिसन्दध्यात् । अथावस्कन्दं दद्यात् । शौण्डिकव्यञ्जनो वा दैवतप्रेतकार्योत्सवसमाजेष्वाटविकान् सुराविक्रयोपायननिमित्तं मदनरसयोगाभ्यामतिसन्दध्यात् । अथावस्कन्दं दद्यात् ।

ग्रामघातप्रविष्टां वा विक्षिप्य बहुधाटवीम् ।
घातयेदिति चोराणामपसर्पाः प्रकीर्तिताः ॥

इति कौटलीयार्थशास्त्रे दुर्गलम्भोपाये त्रयोदशाधिकरणे तृतीयोऽध्यायः अपसर्पप्रणिधिः,
आदितस्त्रिचत्वारिंशच्छततमः ॥

पुरुषभूता इति शेषः, ततः चोरान्, मदनरसविकारकाले मादकविद्धान्नपानोपयोगनिमित्तचित्तविभ्रमावसरे विषविद्धान्नपानोपयोगनिमित्तसंज्ञानाशावसरे च, गृहीतलोप्त्रभाराः चोरसकाशोपात्तमुष्टद्रव्यभाराः सन्तः, अवस्कन्दयेयुः गृह्णीयुर्घातयेयुर्वा । मदनरसयोगस्य प्रकारान्तरमाह—सङ्कर्षणदैवतीयो वेति । सङ्कर्षणो बलभद्राख्यं मद्यप्रियं दैवतं तद्भक्तो वा, मुण्डजटिलव्यञ्जनः, प्रहवणकर्मणा तुष्टिभोजनदानच्छद्मना, मदनरसयोगाभ्याम् अतिसन्दध्यात्, अर्थात् चोरान् । अथ अवस्कन्दं दद्यात् मदनरसविकारकाले । प्रकारान्तरमाह—शौण्डिकव्यञ्जनो वेत्यादि । सुराविक्रयोपायननिमित्तं सुराया विक्रयार्थं यदुपायनमुपहरणं तत् निमित्तं कृत्वेत्यर्थः ।

प्रान्ते श्लोकमाह — ग्रामघातप्रविष्टां वेति । ग्रामघातार्थं प्रविष्टाम्, अटवीम् आटविकांश्चोरानित्यर्थः, बहुधा बहुभिर्योगप्रकारैः, विक्षिप्य विकृतचित्तान् कृत्वा, घातयेत् । इति एवं चोराणामपसर्पाः, प्रकीर्तिताः उपदिष्टाः ॥

इति कौटलीयार्थशास्त्रव्याख्यायां दुर्गलम्भोपाये त्रयोदशेऽधिकरणे तृतीयोऽध्यायः अपसर्पप्रणिधिः,
आदितस्त्रिचत्वारिंशच्छततमः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

१७४,१७५. प्रक. पर्युपासनकर्म, अवमर्दश्च ।

कर्शनपूर्वं पर्युपासनकर्म । जनपदं यथानिविष्टमभये स्थापयेत् । उत्थितमनुग्रहपरिहाराभ्यां निवेशयेदन्यत्रापसरतः; समग्रमन्यस्यां भूमौ निवेशयेदेकस्यां वा वासयेत् । न ह्यजनो जनपदो राज्यमजनपदं वा भवतीति कौटल्यः ।

विषमस्थस्य मुष्टिं सस्यं वा हन्याद् वीवधप्रसारौ च ।
प्रसारवीवधच्छेदान्मुष्टिसस्यवधादपि ।
वमनाद् गूढघाताच्च जायते प्रकृतिक्षयः ॥

प्रभूतगुणवद्धान्यकुप्ययन्त्रशस्त्रावरणविष्टिरश्मिसमग्रं मे सैन्य-

---

पर्युपासनकर्मेति सूत्रम् । परदुर्गं परित उपासनकर्म सैन्यनिवासनव्यापारोऽभिधीयत इति सूत्रार्थः ।

कर्शनेत्यादि । पर्युपासनकर्म, कर्शनपूर्वं कोशदण्डरेचनामात्यवधादि कर्शनं तत्पुरस्सरं, कर्तव्यमिति शेषः । कर्शने च शत्रोः क्रियमाणे जनपदो न पीडनीयः किन्तु रक्षणीय इति वक्तुमाह — जनपदमित्यादि । तं, यथानिविष्टं यथापरनिवेशितरूपम्, अभये स्थापयेत्, अभयमित्यपि पाठः । उत्थितमिति । कृष्यादिप्रयासोद्यतं जनं, अनुग्रहपरिहाराभ्यां धनदानकरमोक्षणाभ्यां, निवेशयेद्, अपसरतोऽन्यत्र अपसरन्तं वर्जयित्वा, अपसरतोऽनुग्रहपरिहारौ न कार्यावित्यर्थः । समग्रमिति । अधिकम्, अन्यस्यां भिन्नभिन्नायां भूमौ, निवेशयेद्; एकस्यां वा वासयेद्, एकस्थं वेत्यपि पाठः । किमर्थं जनस्थापनादिकं तात्पर्येणोपदिश्यते, तत्राह — नह्यजनो जनपद इत्यादि । जनरहितस्य जनपदव्यपदेशाभावाद् जनपदरहितस्य राज्यव्यपदेशाभावाच्च जनस्थापनादिकमावश्यकमित्यर्थः ।

कर्शनप्रकारमाह — विषमस्थस्येति । शत्रूपरोधसंकटप्राप्तस्य, मुष्टिं बीजवापं, सस्यं वा, हन्यात् । वीवधप्रसारौ च वीवधो धान्यस्नेहादिभारः प्रसारः तृणकाष्ठादिप्रवेशः तौ च, हन्यात् ।

प्रकृतिक्षयहेतून् संगृह्णाति— प्रसारवीवधच्छेदादित्यादि । वमनाद् अन्यत्र नयनात् । प्रकृतिक्षयः अमात्याद्यपचयः ।

कस्यामवस्थायां पर्युपासनं कर्तव्यमित्याह — प्रभूतेत्यादि । प्रचुरसारधान्यादिससकसम्पन्नं, तत्र आवरणं पेटीचर्मादि. विष्टिः कर्मकरः रश्मिः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मृतुश्च पुरस्तात्; अपर्तुः परस्य व्याधिदुर्भिक्षनिचयरक्षाक्षयः क्रीतबलनिर्वेदो मित्रबलनिर्वेदश्च' इति पर्युपासीत।

कृत्वा स्कन्धावारस्य रक्षां वीवधासारयोः पथश्च, परिक्षिप्य दुर्गं खातसालाभ्यां, दूषयित्वोदकमवस्राव्य परिखाः संपूरयित्वा वा, सुरुङ्गाबलकुटिकाभ्यां वप्रप्राकारौ हारयेत्।

दारं च गुलेन निम्नं वा पांसुमालयाच्छादयेत्। बहुलारक्षं यन्त्रैर्घातयेत्। निष्कराटुपनिष्कृष्याश्वैश्च प्रहरेयुः। विक्रमान्तरेषु च नियोगविकल्पसमुच्चयैश्चोपायानां सिद्धिं लिप्सेत दुर्गवासिनः।

प्रग्रहः, शेषं प्रतीतम्। मे सैन्यम्, ऋतुश्च पुरस्तात् कालश्चानुकूल उपस्थितः, परस्य अपर्तुः प्रतिकूलः कालः, व्याधिदुर्भिक्षनिचयरक्षाक्षयः व्याधिना दुर्भिक्षेण च निचयस्य सञ्चितधनादेः रक्षाया आरक्षकाणां च क्षयः, क्रीतबलनिर्वेदः क्रयेणाधिगतस्य बलस्य कृतश्रमवैफल्यदर्शनेन भूयस्साह्यकरणाद् विरिंरंसा, मित्रबलनिर्वेदश्च, अस्तीति सर्वत्र शेषः। इति अस्यामवस्थायामिति शेषः, पर्युपासीत।

पर्युपासनप्रकारमाह—कृत्वेत्यादि। स्कन्धावारस्य स्वसेनानिवेशस्य। परिक्षिप्य दुर्गं परस्य स्थानीयं परिगत्य। खातसालाभ्यां खातसालानुसारेण। अवस्राव्य निर्गतजलाः कृत्वा। सुरुङ्गाबलकुटिकाभ्यां तिर्यग्भूखातैः सैन्यपल्लीभिश्च, जातौ चेहैकत्वविवक्षया द्विवचनम्। हारयेत् आक्रामेत्।

दारमित्यादि। दारं दीर्णदेशम्। गुलेन छादनसाधनपिण्डेन। बहुलेनेति पाठश्चिन्त्यार्थः। बहुलारक्षं प्रचुररक्षाविधानं प्रदेशम्। **निष्कराद्**ति। निन्दितकरणात् कपटादित्यर्थः, अथवा करः शुण्डा निरायतः करो यस्य स निष्करः प्रसारितकरः अर्थात् करिणं तथाभूतं विधायेति ल्यब्लोपे पञ्चमी, दुष्करादिति पाठेऽपि कपटादित्यर्थः। निष्कुरादित्युकारमध्यस्तु मृग्यार्थः पाठः। अश्वैश्च चकाराद् गजैश्च। प्रहरेयुः अर्थादारक्षान्। **विक्रमान्तरेषु** चेति। विक्रमविशेषेषु च परैः प्रदर्श्यमानेष्वित्यर्थः, उपायानां नियोगविकल्पसमुच्चयैश्च अयमेवात्रोपायोऽनुष्ठेय इति व्यवस्था नियोगः अयं वासौ वेति विकल्पः अयं चासौ चेति समुच्चयः एतैर्यथाविषयमनुष्ठितैः, सिद्धिं लिप्सेत, दुर्गवासिनः दुर्गगतस्य शत्रोः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

श्येनकाकनप्तृभासशुकशारिकोलूककपोतान् ग्राहयित्वा पुच्छेष्वग्नियोगयुक्तान् परदुर्गे विसृजेयुः ।

अपकृष्टस्कन्धावारादुच्छ्रितध्वजधन्वारक्षा वा मानुषेणाग्निना परदुर्गमादीपयेत् ।

गूढपुरुषाश्चान्तदुर्गपालका नकुलवानरविडालशुनां पुच्छेष्वग्नियोगमाधाय काण्डनिचयरक्षाविधानवेश्मसु विसृजेयुः ।

शुष्कमत्स्यानामुदरेष्वग्निमाधाय वल्लूरे वा वायसोपहारेण वयोभिर्हारयेयुः ।

सरलदेवदारुपूतितृणगुग्गुलुश्रीवेष्टकसर्जरसलाक्षागुलिकाः खरोष्ट्राजावीनां लण्डं चाग्निधारणम् ।

श्येनकाकेत्यादि । तत्र नप्ता विष्किराख्यः पक्षी, शेषाः प्रतीताः । पुच्छेषु अग्नियोगयुक्तान् अग्निप्रज्वलनोपाययुक्तान् । विसृजेयुः विसृष्टश्येनादिपुच्छपरिपतिताग्नियोगद्वारेण परदुर्गं दीपयेयुरित्यर्थः ।

अपकृष्टस्कन्धावारादिति । अधःस्थात् स्वस्कन्धावारात्, उच्छ्रितध्वजधन्वा उच्छ्रिता अग्निक्षेपार्थमुन्नमिता ध्वजाः पताका धन्वानि धनूंषि च येन स तथाभूतः, आरक्षा वा, मानुषेणाग्निना शत्रुनिहतस्य वा शूलारोपणमारितस्य वा मनुष्यस्यास्थ्ना कल्माषवेणुना मथनादुत्थितेनाग्निना, परदुर्गम् आदीपयेत् । आरक्षांशे 'आदीपयेयुरि'ति विपरिणामेन संबन्धः । 'आदीपयेयुरि'त्येव क्वचित् पाठः ।

गूढपुरुषाश्चेत्यादि । अन्तदुर्गपालकाः अन्तपालकदुर्गपालकव्यञ्जना इत्यर्थः । काण्डनिचयरक्षाविधानवेश्मसु येषु बाणाः कुप्यादिवर्गा वा सञ्चित्य रक्ष्यन्ते तेषु गृहेषु ।

शुष्कमत्स्यानामित्यादि । अग्निमाधाय वक्ष्यमाणगुलिकादिकमग्निधारणं निवेश्य । वल्लूरे वा शुष्कमांसे वा । वायसोपहारेण पक्षिसंबन्ध्युपहारात्मना ।

सरलेत्यादि । तत्र सरलः पीतद्रुः, देवदारुः दारुहरिद्रा, पूतितृणं रोहिषतृणम्, गुग्गुलुः कालनिर्यासः, श्रीवेष्टकः सरलनिर्यासः, सर्जरसः यक्षधूपः, लाक्षा जतु ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रियालचूर्णमवल्गुजमषीमधूच्छिष्टमश्वखरोष्ट्रगोलण्डामित्येष क्षेप्योऽग्नियोगः ।

सर्वलोहचूर्णमग्निवर्णं वा कुम्भीसीसत्रपुचूर्णं वा पारिभद्रकपलाशपुष्पकेशमषीतैलमधूच्छिष्टकश्रीवेष्टकयुक्तोऽग्नियोगः विश्वासघाती वा । तेनावलिप्तः शणत्रपुसवल्कवेष्टितो बाण इत्यग्नियोगः ।

नत्वेव विद्यमाने पराक्रमेऽग्निमवसृजेत् । अविश्वास्यो ह्यग्निः दैवपीडनं च, अप्रतिसंख्यातप्राणिधान्यपशुहिरण्यकुप्यद्रव्यक्षयकरः । क्षीणनिचयं चावाप्तमपि राज्यं क्षयायैव भवति ।

इति पर्युपासनकर्म ।

'सर्वारम्भोपकरणविष्टिसम्पन्नोऽस्मि; व्याधितः पर उपधाविरुद्धप्रकृतिरकृतदुर्गकर्मनिचयो वा निरासारः सासारो वा पुरा मित्रैः सन्धत्ते' इत्यवमर्दकालः ।

प्रियालेत्यादि । तत्र प्रियालो राजादनः, अवल्गुजः सोमराजिसंज्ञौषधिः, मषी शेफालिकाभेदः । मधूच्छिष्टं सिक्थः ।

सर्वलोहचूर्णमित्यादि । तत्र कुम्भी श्रीपर्णी, सीसत्रपुणी लोहभेदौ । पारिभद्रको निम्बः, पलाशः किंशुकः, केशं ह्रीवेरम् । विश्वासघाती विश्वासविषय एव सन् हन्तीति तथोच्यते । **तेनावलिप्त** इत्यादि । शणः क्षुपभेदः, त्रपुसं तन्नामप्रसिद्ध ओषधिभेदः । बाणोऽर्जुनवृक्षः ।

त एतेऽग्नियोगाः पराक्रमसद्भावे न प्रयोक्तव्या इत्याह — **नत्वेवे**त्यादि । अविश्वास्यः अतिप्रवृद्धोऽदिधक्षितमपि निर्दहतीत्यतो विश्वसितुमर्हः । दैवपीडनं च पीडनवर्गे प्रथमगणितं दैवपीडनं च । अप्रतिसंख्यातेत्यादिपदे अप्रतिसंख्यातेत्यस्यासंख्येत्यर्थः । क्षीणनिचयं प्राणिधान्यादिसञ्चयो निचयः स क्षीणो यस्मिंस्तत् ।

इति पर्युपासनकर्मेति । व्याख्यातमिति शेषः ।

अवमर्द इति सूत्रम् । अवमर्दः परदुर्गग्रहणं स कदा कथं कर्तव्य इत्ययमर्थोऽत्राभिधीयत इति सूत्रार्थः ।

अवमर्दकालमाह — **सर्वारम्भे**त्यादि । सर्वविधैः सैन्यसन्नाहैः सैन्यभक्तावरणाद्युपकरणैः कर्मकरैश्चाहं सम्पन्नोऽस्मि; शत्रुस्तु व्याधिपीडितो वा, उपधाप्रत्यक्षिताशुचिभावैरमात्यैर्युक्तो वा, अकृतदुर्गसंस्कारधनधान्यादिसञ्चयो

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्वयमग्नौ जाते समुत्थापिते वा प्रहवणे प्रेक्षानीकदर्शनसङ्गसौरिककलहेषु नित्ययुद्धश्रान्तबले बहुलयुद्धप्रतिविद्धप्रेतपुरुषे जागरणक्लान्तसुप्तजने दुर्दिने नदीवेगे वा नीहारसम्प्लवे वावमृद्नीयात् ।

स्कन्धावारमुत्सृज्य वा वनगूढः शत्रुः सत्रान्निष्क्रान्तं घातयेत् ।

मित्रासारमुख्यव्यञ्जनो वा संरुद्धेन मैत्रीं कृत्वा दूतमभित्यक्तं प्रेषयेत्— 'इदं ते छिद्रम्; इमे दूष्याः; संरोद्धुर्वा छिद्रमयं ते कृत्यपक्षः' इति । तं प्रतिदूतमादाय निर्गच्छन्तं विजिगीषुर्गृहीत्वा दोषमभिविख्याप्य प्रवास्यापगच्छेत् ततः । मित्रासारव्यञ्जनो वा संरुद्धं ब्रूयात्— 'मां त्रातुमुपनिर्गच्छ; मया वा सह संरोद्धारं जहि' इति । प्रतिपन्नमुभयतस्संपीडनेन घातयेत्; जीवग्राहेण वा राज्यविनिमयं कारयेत्; नगरं वास्य प्रमृद्नीयात्; सारबलं वास्य वमयित्वाभिहन्यात् ।

वा सुहृद्बलरहितो वा, संभावितसुहृद्बलोऽपि मित्रैः सन्धास्यते न त्वद्यापि कृतसन्धिः इति यदा विजिगीषुर्मन्यते; तदा स परमवमृद्नीयादित्यर्थः ।

स्वयमित्यादि । प्रेक्षानीकदर्शनसङ्गसौरिककलहेषु प्रेक्षायां नृत्तादौ अनीकदर्शने सैन्यमिथ्यायुद्धप्रेक्षणे च सङ्ग आसक्तिः तस्मिन् सौरिककलहेषु शौण्डिकोत्पादितेषु कलहेषु च । नित्ययुद्धश्रान्तबल इत्यादिविशेषणत्रयस्य परस्मिन्निति विशेष्यं गम्यम् । नदीवेगे वेगवाहिनदीतरणकाले । नीहारसंप्लवे अवश्यायनिमित्तोपप्लवे ।

स्कन्धावारमित्यादि । सत्राद् वनात् । यदि शत्रुर्वने गूढस्थितः तर्हि तस्य वनान्निष्क्रमणं प्रतीक्ष्य तं विजिगीषुर्घातयेदित्यर्थः । 'शत्रुं निष्क्रान्तम्' इति पाठे तु स्फुट एवार्थः ।

मित्रेत्यादि । मित्रासारमुख्यव्यञ्जनो मित्रव्यञ्जनो वा सुहृद्बलमुख्यवेषो वा । अभित्यक्तं वध्यम् । अभिव्यक्तामिति पाठे वध्यत्वेन निश्चितम् । प्रेषयेत् लेखं दत्त्वेति शेषः । इदं ते इत्यादि लेखार्थप्रदर्शनम् । दूष्याः त्वदीयाः अपकर्तारः परस्य त्वच्छिद्रप्रविवक्षोः साहाय्यदानजागरूकाः । ते कृत्यपक्षः संरोद्धृच्छिद्रप्रविवक्षोस्तव साहाय्यदानजागरूकः परकीयक्रुद्धलुब्धादिवर्गः । तमित्यादि । तम् अभित्यक्तम् । प्रतिदूतम् आदाय प्रतिलेखार्थं गृहीत्वा । दोषम् आत्मापकारम् । प्रवास्य मारयित्वा । ततः अपगच्छेत्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तेन दण्डोपनताटविका व्याख्याताः ।

दण्डोपनताटविकयोरन्यतरो वा संरुद्धस्य प्रेषयेत्—'अयं संरोद्धा व्याधितः, पार्ष्णिग्राहेणाभियुक्तः, छिद्रमन्यदुत्थितम्, अन्यस्यां भूमावपयातुकामः' इति । प्रतिपन्ने संरोद्धा स्कन्धावारमादीप्यापयायात्, ततः पूर्ववदाचरेत् ।

पण्यसम्पातं वा कृत्वा पण्येनैनं रसविद्धेनातिसन्दध्यात् ।

आसारव्यञ्जनो वा संरुद्धस्य दूतं प्रेषयेत् — 'मया बाह्यमभिहतमुपनिर्गच्छाभिहन्तुम्' इति । प्रतिपन्नं पूर्ववदाचरेत् ।

मित्रं बन्धुं वापदिश्य योगपुरुषाः शासनमुद्राहस्ताः प्रविश्य दुर्गं ग्राहयेयुः ।

आसारव्यञ्जनो वा संरुद्धस्य प्रेषयेत् — 'अमुष्मिन् देशे काले च स्कन्धावारमभिहनिष्यामि ; युष्माभिरपि योद्धव्यम्' इति । प्रतिपन्नं यथोक्तमभ्याघातसंकुलं दर्शयित्वा रात्रौ दुर्गान्निष्क्रान्तं घातयेत् ।

संरुद्धपक्षादपसरेत् । प्रकारान्तरमाह — **मित्रासारव्यञ्जनो वेत्यादि** । उभयतः पुरः पश्चाच्च । वमयित्वा दुर्गान्निर्गमय्य ।

उक्ताः प्रकारा दण्डोपनताटविकद्वाराप्यनुष्ठेया इत्याह — **तेन दण्डोपनताटविका इत्यादि** ।

तत्र प्रकारान्तरमाह — **दण्डोपनताटविकयोरित्यादि** । ततः पूर्ववदाचरेदिति । पूर्ववदाचरणं च उभयतःसंपीड्यघातनादिकं पूर्वोक्तम् ।

पण्येत्यादि । पण्यसम्पातं पण्यविक्रेतृसङ्घागमनम् ।

प्रकारान्तरमाह — **आसारव्यञ्जनो वेत्यादि** । सन्देशार्थमाह — **मया बाह्यमित्यादि** । मया प्रथममभिहन्यमानं शत्रुमनुहन्तुं दुर्गान्निष्क्रान्तो भवेत्यर्थः । **प्रतिपन्नमित्यादि** । पूर्ववदाचरेत् उभयतःसम्पीड्यघातनादिकं कुर्यात् ।

मित्रमित्यादि । मित्रं बन्धुं वापदिश्य आत्मनो मित्रत्वं बन्धुत्वं वा निमित्तं कल्पयित्वा । शासनमुद्राहस्ताः मुद्रितकूटलेख्यहस्ताः ।

आसारव्यञ्जनेन कर्तव्यमन्यमतिसन्धानप्रकारमाह — **आसारव्यञ्जनो वेत्यादि** । अभ्याघातसंकुलं विजिगीषुस्कन्धावाराभिहननतुमुलं, तत्प्रदर्शनं च संरुद्धविश्वासार्थम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यद्वा मित्रमावाहयेद्, आटविकं वा, तमुत्साहयेत्—'विक्रम्य संरुद्धे भूमिमस्य प्रतिपद्यस्व' इति । विक्रान्तं प्रकृतिभिर्दूष्यमुख्यावग्रहेण वा घातयेत्; स्वयं वा रसेन । 'मित्रघातकोऽयम्' इत्यवाप्तार्थः ।

विक्रमितुकामं वा मित्रव्यञ्जनः परस्याभिशंसेत्; आप्तभावोपगतः प्रवीरपुरुषानस्योपघातयेत् ।

सन्धिं वा कृत्वा जनपदमेनं निवेशयेत्; निविष्टमन्यजनपदमविज्ञातो हन्यात् ।

अपकारयित्वा दूष्याटविकेषु वा बलैकदेशमतिनीय दुर्गमवस्कन्देन हारयेत् ।

दूष्यामित्राटविकद्वेष्यप्रत्यपसृताश्च कृतार्थमानसंज्ञाचिह्नाः परदुर्गमवस्कन्देयुः ।

प्रकारान्तरमाह—यद्वेत्यादि । तम् उत्साहयेत् मित्राटविकान्यतरं पराभियोगायोद्योजयेत् । प्रकृतिभिः अमात्यादिभिः । दूष्यमुख्यावग्रहेण वा दूष्यमुख्यस्वविधेयीकरणेन । दूष्यमुख्योपग्रहेणेति पाठे दूष्यमुख्यानुकूलनेनेत्यर्थः । मित्रघातकोऽयमित्यवाप्तार्थ इति । परं मित्रघातक इति प्रख्याप्य स्वार्थं साधयेदित्यर्थः ।

प्रकारान्तरमाह—विक्रमितुकामं वेत्यादि । विजिगीषुस्त्वयि विक्रमितुमिच्छतीत्येवं शत्रोस्तन्मित्रव्यञ्जनः कथयेत्, प्रतिपद्य चैवं तस्याप्तभावं तदीयान् प्रवीरपुरुषान् घातयेदित्यर्थः ।

परेण सन्धिं कृत्वा तेनैव स्वराष्ट्रे जनपदनिवेशमन्यं कारयित्वा तं तदविज्ञातो हन्यादित्याह—सन्धिं वेत्यादि ।

स्वदूष्याटविकेषु विषये परस्य बलैकदेशमपकारं कारयित्वा तेन निमित्तेन तमतिदूरे नीत्वा च बलैकदेशविरहेण सुखाक्रमणीयतामापन्नं परदुर्गं प्रसभाक्रमणेनापहरेदिति प्रकारमन्यमाह—अपकारयित्वेत्यादि ।

अवस्कन्दसहायाः के इत्यत्राह—दूष्यामित्रेत्यादि । तत्र प्रत्यपसृताः परस्मादपसृत्य पुनस्तं प्रत्यागताः । शेषास्तु प्रतीताः । कृतार्थमानसंज्ञाचिह्नाः कृतार्थमाना धनाभरणादिदानसत्कृताः कृतसंज्ञाचिह्नाश्च ग्राहितावस्कन्दकालसूचकसङ्केताश्च ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

परदुर्गमवस्कन्द्य स्कन्धावारं वा पतितपराङ्मुखाभिपन्नमुक्तकेशशस्त्रभयविरूपेभ्यश्चाभयमयुध्यमानेभ्यश्च दद्युः । परदुर्गमवाप्य विशुद्धशत्रुपक्षः कृतोपांशुदण्डप्रतीकारमन्तर्बहिश्च प्रविशेत् ।

एवं विजिगीषुरमित्रभूमिं लब्ध्वा मध्यमं लिप्सेत । तत्सिद्धावुदासीनम् । एष प्रथमो मार्गः पृथिवीं जेतुम् ।

मध्यमोदासीनयोरभावे गुणातिशयेनारिप्रकृतीः साधयेत् । तत उत्तराः प्रकृतीः । एष द्वितीयो मार्गः ।

मण्डलस्याभावे शत्रुणा मित्रं मित्रेण वा शत्रुमुभयतःसम्पीडनेन साधयेत् । एष तृतीयो मार्गः ।

शक्यमेकं वा सामन्तं साधयेत्; तेन द्विगुणो द्वितीयं, त्रिगुणस्तृतीयम् । एष चतुर्थो मार्गः पृथिवीं जेतुम् ।

परदुर्गस्य परस्कन्धावारस्य वावस्कन्दे सिद्धेऽनन्तरकरणीयमाह—**परदुर्गमित्यादि** । पतितेत्यादिपदे अभिपन्नो विपद्गतः शस्त्रभयविरूपः शस्त्रभयविकृताकारः । शेषाः प्रतीताः । **परदुर्गमित्यादि** । विशुद्धशत्रुपक्षः उत्सारितशत्रुपक्ष्यः । विशुद्धशत्रुपक्षमिति पाठे क्रियाविशेषणम् । अन्तर्बहिश्च दुर्गस्यान्तर्भागं बहिर्भागं च ।

अनेन प्रकारेण शत्रोर्भूमिं लब्ध्वा ततो मध्यमस्य तत उदासीनस्य च लब्धुमीहेतेत्येष पृथिवीजयस्य प्रथमो मार्ग इत्याह — **एवं विजिगीषुरित्यादि** ।

मध्यमोदासीनसत्तायामुक्तः क्रमः । तदभावे त्वाह—**मध्यमोदासीनयोरभाव** इत्यादि । गुणातिशयेन शत्रुगुणातिशायिना स्वगुणेन । अरिप्रकृतीः साधयेत् शत्रोरमात्यादीन् स्वानुरक्तान् कुर्यात् । उत्तराः प्रकृतीः कोशदण्डादिकाः ।

तृतीयं मार्गमाह — **मण्डलस्याभाव** इत्यादि । मण्डलं दशराजकं तस्याभावे ।

चतुर्थमाह — **शक्यमेकमित्यादि** । शक्यम् आत्मसुजयम् । तेन द्विगुणः साधितेनैकेन सामन्तेन सहायभूतेन द्विगुणात्मबलः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

जित्वा च पृथिवीं विभक्तवर्णाश्रमां स्वधर्मेण भुञ्जीत ।
उपजापोऽपसर्पो वा वामनं पर्युपासनम् ।
अवमर्दश्च पञ्चैते दुर्गलम्भस्य हेतवः ॥

इति कौटलीयार्थशास्त्रे दुर्गलम्भोपाये त्रयोदशाधिकरणे
चतुर्थोऽध्यायः पर्युपासनकर्म अवमर्दश्च, .
आदितश्चतुश्चत्वारिंशच्छततमः ॥

जित्वा चेत्यादि । स्वधर्मेण यथायथं वर्णाश्रमयोः विहितेन धर्मेण मन्वाद्युक्तेन ।

उक्तान् दुर्गलम्भहेतून् श्लोकेन संगृह्णाति — उपजापोऽपसर्पो वेत्यादि । उपजापापसर्पौ चेति क्वचित् पाठः ।

इति कौटलीयार्थशास्त्रव्याख्यायां दुर्गलम्भोपाये त्रयोदशोऽधिकरणे
चतुर्थोऽध्यायः पर्युपासनकर्म अवमर्दश्च ।
आदितश्चतुश्चत्वारिंशच्छततमः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

१७६. प्रक. लब्धप्रशमनम् ।

द्विविधं विजिगीषोः समुत्थानम् — अटव्यादिकमेकग्रामादिकं च ।

त्रिविधश्चास्य लम्भः — नवो, भूतपूर्वः, पित्र्य इति ।

नवमवाप्य लम्भं परदोषान् स्वगुणैश्छादयेत् गुणान् गुणद्वैगुण्येन । स्वधर्मकर्मानुग्रहपरिहारदानमानकर्मभिश्च प्रकृतिप्रियहितान्यनुवर्तेत । यथासम्भाषितं च कृत्यपक्षमुपग्राहयेत् । भूयश्च कृतप्रयासम् । अविश्वास्यो हि विसंवादकः स्वेषां परेषां च भवति; प्रकृतिविरुद्धाचारश्च । तस्मात् समानशीलवेषभाषाचारतामुपगच्छेत् । देशदैवतसमाजोत्सवविहारेषु च भक्तिमनुवर्तेत ।

लब्धप्रशमनमिति सूत्रम् । विजिगीषुणा लब्धस्य परदुर्गादिकस्य प्रशमनं लब्धप्रशमनम् । तच्च दुर्गादिवासिनाम् अपूर्वभूपतिविषयशङ्काद्यपोहनेन स्वात्मनि विस्रम्भजननम् । तदिहोच्यत इति सूत्रार्थः ।

द्विविधमित्यादि । समुत्थानम् उद्योगः, तेन तदुपार्जितं लक्ष्यते । अटव्यादिकमित्यादिपदेन खन्यादिकम् एकग्रामादिकमित्यादिपदेन नगरादिकं च ग्राह्यम् ।

त्रिविधश्चेत्यादि । लम्भो लाभः तेन लब्धोऽर्थो लक्ष्यते । नवः अस्वीय एव विजिगीषुणा शत्रुसकाशार्जितः । भूतपूर्वः स्वीय एव शत्रुवशे स्थितस्तं जित्वा प्रत्याहृतः । पित्र्यः स्वपितृसंबन्ध्येवार्थः परहस्तगतः परं जित्वा प्रत्याहृतः ।

तत्र नवलम्भे विधिमाह — नवमवाप्येत्यादि । छादयेत् विस्मारयेत् । गुणान् परकीयान् । गुणद्वैगुण्येन परगुणातिशायिस्वगुणप्रदर्शनेन । **स्वधर्मकर्मानुग्रहपरिहारदानमानकर्मभिरित्यादि** । स्वीयैर्धर्मानुष्ठानैः कृष्यादिकर्मसु ऋणदानाद्युपकारैः करमोक्षणैः भूम्यादिदानकर्मभिः पूजनकर्मभिश्च । यथासंभाषितं पूर्वकृतसंविदनुसारेण । कृत्यपक्षं परकीयं क्रुद्धादिवर्गं कृतात्मोपकारम् । उपग्राहयेद् धनादिदानेन प्रीणयेदित्यर्थः । भूयः बहुतरम् । कृतप्रयासं कृतपरिश्रमप्रकर्षम् । प्रकृतिविरुद्धाचारः राष्ट्रजनविरुद्धवृत्तवेषादिपरिग्रहः । देशदैवतसमाजोत्सवविहारेषु लब्धे देशे यद् दैवतं जनैराद्रियमाणं समाज उत्सवो विहारश्च, तेषु ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

देशग्रामजातिसङ्घमुख्येषु चाभीक्ष्णं सत्रिणः परस्यापचारं दर्शयेयुः। माहाभाग्यं भक्तिं च तेषु स्वामिनः स्वामिसत्कारं च विद्यमानम्। उचितैश्चैनान् भोगपरिहाररक्षावेक्षणैर्भुञ्जीत। सर्वदेवताश्रमपूजनं च विद्यावाक्यधर्मशूरपुरुषाणां च भूमिद्रव्यदानपरिहारान् कारयेत्। सर्वबन्धनमोक्षणमनुग्रहं दीनानाथव्याधितानां च। चातुर्मास्येष्वर्धमासिकमघातं; पौर्णमासीषु च चातूरात्रिकं; राजदेशनक्षत्रेष्वेकरात्रिकम्। योनिबालवधं पुंस्त्वोपघातं च प्रतिषेधयेत्। यच्च कोशदण्डोपघातिकमधर्मिष्ठं वा चरित्रं मन्येत, तदपनीय धर्म्यव्यवहारं स्थापयेत्। चोरप्रकृतीनां म्लेच्छजातीनां च स्थानविपर्यासमनेकस्थं कारयेद् दुर्गराष्ट्रदण्डमुख्यानां च। परोपगृहीतानां च मन्त्रिपुरोहितादीनां परस्य प्रत्यन्तेष्वनेकस्थं वासं कारयेत्। अपकारसमर्थाननु क्षियतो वा भर्तृविनाशमुपांशुदण्डेन प्रशमयेत्। स्वदेशीयान् वा परेण वावरुद्धानपवाहितस्थानेषु स्थापयेत्।

देशग्रामेत्यादि। परस्य जितस्य शत्रोः। अपचारम् अहितानुष्ठानम्। माहेत्यादि। माहाभाग्यं महाभागत्वम्। तेषु स्वदेशीयेषु ग्रामजातिसङ्घमुख्येषु। भक्तिं वात्सल्यम्। उचितैरित्यादि। भोगपरिहाररक्षावेक्षणैः भोगो राजभागः परिहारः करमोक्षः रक्षावेक्षणं कण्टकशोधनम् एतैः। भुञ्जीत उपयुञ्जीत। सर्वदेवतेत्यादि। विद्यावाक्यधर्मशूरपुरुषाणां विद्याशूराः पुरुषा विपश्चितः वाक्यशूरा वाग्मिनः धर्मशूराः धार्मिकाः तेषाम्। सर्वेत्यादि। सर्वबन्धनमोक्षणं सर्वेषां काराबद्धानां बन्धनाद् मोचनम्। चातुरित्यादि। चातुर्मास्येषु चतुर्षु चतुर्षु मासेष्वतीतेषु, अर्धमासिकमघातं पञ्चदशदिवसव्यापकं प्राणिवधप्रतिषेधं, पौर्णमासीषु च, चातूरात्रिकं रात्रिचतुष्टयव्यापकमघातं, राजदेशनक्षत्रेषु राजनक्षत्रेषु देशलम्भनक्षत्रेषु च, एकरात्रिकम् एकरात्रिव्यापकमघातं, कारयेदिति वर्तते। योनिबालवधं योनयो विजननक्षमाः कुक्कुट्यादयः बालाः भक्ष्यप्राणितर्णकाः तेषां वधं, पुंस्त्वोपघातं च षण्डीकरणं च, प्रतिषेधयेत्। यच्चेत्यादि। धर्म्यव्यवहारं धर्मानपेतचरित्रानुष्ठानम्। चोरप्रकृतीनामित्यादि। स्थानविपर्यासं स्थितिव्यत्ययम्। अनेकस्थम् असंहतम्। परोपगृहीतानां चेत्यादि। प्रत्यन्तेषु विषयान्तेषु। अनेकस्थं भिन्नभिन्नप्रदेशगतम्। अपकारसमर्थानित्यादि। भर्तृविनाशमनु क्षियतः स्वामिविनाशं लक्षीकृत्य वसतः। उपांशुदण्डेन रहोवधेन। स्वदेशीयान् वेत्यादि। अवरुद्धान् कारायां नियन्त्रितान्। अपव-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यश्च तत्कुलीनः प्रत्यादेयमादातुं शक्तः प्रत्यन्ताटवीस्थो वा प्रबाधितुमभिजातः, तस्मै विगुणां भूमिं प्रयच्छेत्; गुणवत्याश्चतुर्भागं वा कोशदण्डदानमवस्थाप्य, यदुपकुर्वाणः पौरजानपदान् कोपयेत्। कुपितैस्तैरेनं घातयेत्, प्रकृतिभिरुपकुष्टमपनयेद्, औपघातिके वा देशे निवेशयेदिति ।

भूतपूर्वे येन दोषेणापवृत्तः, तं प्रकृतिदोषं छादयेत् । येन च गुणेनोपावृत्तः, तं तीव्रीकुर्यादिति ।

पित्र्ये पितृदोषाञ्छादयेत् । गुणांश्च प्रकाशयेदिति ॥

चरित्रमकृतं धर्म्यं कृतं चान्यैः प्रवर्तयेत् ।
प्रवर्तयेन्न चाधर्म्यं कृतं चान्यैर्निवर्तयेत् ॥

इति कौटलीयार्थशास्त्रे दुर्गलम्भोपाये त्रयोदशाधिकरणे पञ्चमोऽध्यायः
लब्धप्रशमनम् । आदितः पञ्चचत्वारिंशच्छततमः
एतावता कौटलीयस्यार्थशास्त्रस्य दुर्गलम्भोपाय-
स्त्रयोदशमधिकरणं समाप्तम् ॥

हितस्थानेषु अपवाहितानां स्वस्वाधिकारप्रच्यावितानां परपक्ष्याणामधिकार-पदेषु ।

यदि परस्मादपहृतां भूमिं तद्वंश्यः कश्चित् प्रत्यादातुं शक्त इति शङ्क्येत विषयान्ताटवीस्थो वा तां बाधितुं शक्त इति शङ्क्येत, तस्मै तथा-विधाय गुणहीनां भूमिं दद्याद्, अथवा गुणवत्या भूमेश्चतुर्थांशं दद्यात् कोशदण्डदानमात्मार्थं तावद् बहु व्यवस्थाप्य, यावतः साधनाय पौरजानप-दान् सपीडयेद्, इत्याह — यश्च तत्कुलीन इत्यादि । यत् कोशदण्ड-दानम् । उपकुर्वाणः साधयन् स्वस्मै ददानो वा । कोपनफलमाह — कुपि-तैरित्यादि । एनं कोपयितारम् । प्रकृतिभिरित्यादि । उपकुष्टं निन्दितम् । औपघातिके उपघातहेतुभूते । इतिशब्दो नवलम्भविधिसमाप्तौ ।

भूतपूर्वलम्भविषयमाह — भूतपूर्वे इत्यादि । अपवृत्तः स्वहस्तात् प्रच्युतः । छादयेत् लोपयेत् । उपावृत्तः परहस्तात् स्वहस्तं प्रत्यापन्नः । तीव्री-कुर्याद् द्रढयेत् ।

पित्र्यलम्भमधिकृत्याह — पित्र्ये इत्यादि । पितृदोषान् यैर्दोषैः पितु-र्हस्तादपवृत्तस्तान् दोषानित्यर्थः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

चरित्रमित्यादि । अकृतम् अन्याप्रवर्तितम् ॥

व्याख्यायामर्थशास्त्रस्य श्रीमूलाख्यानभाजने ।
दुर्गलम्भोपायसंज्ञं त्रयोदशमपूर्यत ॥

इति श्रीवञ्चिमण्डलमहाराजाश्रितस्य ताम्रपर्णीतीरवर्तितरुवाग्रहाराभिजनस्य श्रीसीताम्बाश्रीरामसुब्रह्मण्यार्यसूनोर्महामहोपाध्यायगणपतिशास्त्रिणः कृतिषु कौटलीयार्थशास्त्रव्याख्यायां श्रीमूलाख्यायां दुर्गलम्भोपाये त्रयोदशेऽधिकरणे
पञ्चमोऽध्यायः लब्धप्रशमनम् । आदितः
पञ्चचत्वारिंशच्छततमः ॥
दुर्गलम्भोपायस्त्रयोदशमधिकरणं समाप्तम् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

औपनिषदिकं—चतुर्दशमधिकरणम् ।

१७७. प्रक. परघातप्रयोगः ।

चातुर्वर्ण्यरक्षार्थमौपनिषदिकमधर्मिष्ठेषु प्रयुञ्जीत ।

कालकूटादिः विषवर्गः श्रद्धेयदेशवेषशिल्पभाजनापदेशैः कुब्जवामनकिरातमूकबधिरजडान्धच्छद्मभिः म्लेच्छजातीयैरभिप्रेतैः स्त्रीभिः पुंभिश्च परशरीरोपभोगेष्वाधातव्यः ।

राजक्रीडाभाण्डनिधानद्रव्योपभोगेषु गूढाः शस्त्रनिधानं कुर्युः; सत्राजीविनश्च रात्रिचारिणोऽग्निजीविनश्चाग्निनिधानम् ।

इत्थं त्रयोदशभिरधिकरणैस्तन्त्रावापौ प्रपञ्चितौ, अथ तदुभयानुकूलमौपनिषादिकं चतुर्दशमधिकरणमारभ्यते । उपनिषन्नाम औषधमन्त्ररहस्यं, रहस्यत्वं च गुरूपदेशैकसमधिगम्यप्रयोगतया गोपनीयत्वात्; उपनिषदेव औपनिषदं, तदधिकृत्य प्रवृत्तमौपनिषदिकम् । तच्चेदं हिंसात्मकत्वादधर्मिष्ठेष्वेव प्रयोक्तव्यमित्याह — चातुर्वर्ण्येत्यादि । चातुर्वर्ण्यरक्षार्थं वर्णग्रहणं जातेरप्युपलक्षणं तेन यथावर्णजातिविभक्तधर्मकर्मकं मनुष्यसामान्यं चातुर्वर्ण्यशब्दतो गृह्यते, तस्य रक्षार्थम् अधर्मिष्ठप्रभवाभ्य आपद्भ्योऽनन्यप्रतीकार्याभ्यः परित्राणसिद्धये । तत्र

परघातप्रयोग इति सूत्रम् । शत्रुवधार्थं औषधप्रयोग उच्यत इति सूत्रार्थः ।

कालेत्यादि । कालकूटादिरित्यादिपदेन वत्सनाभहलाहलादीनां ग्रहणम् । श्रद्धेयदेशवेषशिल्पभाजनापदेशैः विश्वसनीयं देशं वेषं शिल्पं भाजनं चात्मनोऽपदिशद्भिः । कुब्जेत्यादिपदे कुब्जादयश्च मूकादिच्छद्मानश्चेति समासः । कुब्जो गड्डुलः, वामनः खर्वः, किरातोऽल्पतनुः । अभिप्रेतैः इष्टैः । परशरीरोपभोगेषु शत्रोर्देहोपभोग्येषु वस्त्रादिषु ।

राजक्रीडेत्यादि । राजक्रीडाभाण्डनिधानद्रव्योपभोगेषु क्रीडनकनिधानेषु भूषणनिधानेषु सुगन्धिद्रव्यनिधानेषु च राजोपभोग्येषु, गूढाः गूढपुरुषाः, शस्त्रनिधानं शस्त्रनिवेशनं कुर्युः । यद्वा राज्ञः क्रीडाभाण्डाद्युपभोगावसरेषु शस्त्रप्रयोगं कुर्युरित्यर्थः । सत्राजीविनश्च सत्रिणश्च, रात्रिचारिणः, अग्निजीविनश्च अयस्कारादयश्च, अग्निनिधानम् अग्निनिवेशनं कुर्युः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

चित्रभेककौण्डिन्यककृकणपञ्चकुष्ठशतपदीचूर्णमुच्चिदिङ्गकम्बलिशतकन्देध्मकृकलासचूर्णं गृहगौलिकान्धाहिककृकणकपूतिकीटगोमारिकाचूर्णं भल्लातकावल्गुकारसयुक्तं सद्यःप्राणहरमेतेषां वा धूमः ।

कीटो वान्यतमस्तप्तः कृष्णसर्पप्रियङ्गुभिः ।
शोषयेदेष संयोगः सद्यःप्राणहरो मतः ॥

धामार्गवयातुधानमूलं भल्लातकपुष्पचूर्णयुक्तमार्धमासिकः ।

व्याघातकमूलं भल्लातकपुष्पचूर्णयुक्तं कीटयोगो मासिकः ।

कलामात्रं पुरुषाणां द्विगुणं खराश्वानां चतुर्गुणं हस्त्युष्ट्राणाम् ।

शतकर्दमोच्चिदिङ्गकरवीरकटुतुम्बीमत्स्यधूमो मदनकोद्रवपला-

चित्रभेकादिचूर्णम् उच्चिदिङ्गादिचूर्णं गृहगौलिकादिचूर्णं च भल्लातकादिरसयुक्तं सद्यःप्राणहरम्, एषां चूर्णानां धूमो वा सद्यःप्राणहर इत्याह — चित्रेत्यादि । तत्र चित्रभेकः चित्रवर्णो मण्डूकः, कौण्डिन्यकः शकृन्मूत्रविषः कीटभेदः, कृकणः पक्षिभेदः कीटभेदो वा, पञ्चकुष्ठं कुष्ठस्य पारिभाव्यस्य त्वक्पत्रपुष्पफलमूलानि, शतपदी कर्णजलूका, उच्चिदिङ्गः अलविषः कीटभेदः । उच्चिटिङ्ग इति सुश्रुते । कम्बली कृमिभेदः, शतं शतमूली नामैकदेशग्रहणात् । कन्दः कण्डूरः, इध्मं पलाशसमित्, कृकलासः सरटः । गृहगौलिका पल्ली, अन्धाहिको मत्स्यभेदः, पूतिकीटः कीटभेदः, गोमारिका ओषधिभेदः । भल्लातकः अरुष्कराख्यो वृक्षभेदः, अवल्गुका अवल्गुजा सोमराजी ॥

कीट इति । अन्यतमः उक्तेष्वेकतमः, कीटः, तप्तः, शोषयेद् आघ्राणादिनोपयुज्यमानः शोषणं कुर्यात् । अयं केवलस्य गुणः । मिश्रितस्य गुणमाह— कृष्णसर्पप्रियङ्गुभिः कृष्णसर्पेण कङ्गुभिश्च सह, संयोगः संप्राप्तयोगः, एष तप्त इत्यार्थम् । सद्यःप्राणहरो मतः ।

धामार्गवेत्यादि । आर्धमासिकः अर्धमासेन प्राणहरो योग इत्यर्थः । तत्र धामार्गवः कोशातकी, यातुधानो राक्षसशब्दवाच्य ओषधिभेदः ।

व्याघातकेत्यादि । भल्लातकपुष्पचूर्णयुक्तेन आरग्वधमूलेन सह तप्तः कीटः कश्चित् कीटयोगो भवति । स उपयुज्यमानो मासेनैकेन प्राणहरो भवतीत्यर्थः । कीटयोगोपयोगमात्रामाह—कलामात्रमित्यादि । कला अल्पोंऽशः । पुरुषाणां नराणाम् । द्विगुणं कलाद्वयमात्रम् ।

शतकर्दमेत्यादि । तत्र कर्दमः यक्षकर्दमः, करवीरः हयमाराख्य

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

लेन हस्तिकर्णपलाशपलालेन वा प्रवातानुवाते प्रणीतो यावच्चरति तावन्मारयति ।

पूतिकीटमत्स्यकटुतुम्बीशतकर्दमेध्मेन्द्रगोपचूर्णं पूतिकीटक्षुद्राराला हेमविदारीचूर्णं वा बस्तशृङ्गखुरचूर्णयुक्तमन्धीकरो धूमः ।

पूतिकरञ्जपत्रहरितालमनश्शिलागुञ्जारक्तकार्पासपलालान्यास्फोटकाचगोशकृद्रसपिष्टमन्धीकरो धूमः ।

सर्पनिर्मोकं गोश्वपुरीषमन्धाहिकशिरश्चान्धीकरो धूमः ।

पारावतप्लवकक्रव्यादानां हस्तिनरवराहाणां च मूत्रपुरीषं कासीसहिङ्गुयवतुषकणतण्डुलाः कार्पासकुटजकोशातकीनां च बीजानि गोमूत्रिकाभाण्डीमूलं निम्बशिग्रुफणिज्जकाक्षीबपीलुकभङ्गः सर्पशफरीचर्म हस्तिनखशृङ्गचूर्णमित्येष धूमो मदनकोद्रवपलालेन हस्तिकर्णपलाशपलालेन वा प्रणीतः प्रत्येकशो यावच्चरति तावन्मारयति ।

ओषधिभेदः, कटुतुम्बी इक्ष्वाकुः । मदनो धुस्तूरः, कोद्रवो धान्यभेदः, हस्तिकर्णः कुस्तुम्बुरुः, पलाशः कच्चोरम्, पलालम् अफलो धान्यादिकाण्डः । प्रवातानुवाते प्रभूतमारुते अभिमारुते च ।

पूतिकीटेत्यादि । तत्र इन्द्रगोपः ज्योतिर्माली नाम कीटः । क्षुद्रा कण्टकारी, अराला यक्षधूपाख्यो निर्यासः, अत एव प्रयोगात् स्त्रियामप्ययम् । हेम धुस्तूरः, विदारी इक्षुगन्धा । अन्धीकरः अन्धङ्करणः ।

पूतिकरञ्जेत्यादि । तत्र पूतिकरञ्जः पूतिकाख्यो वृक्षभेदः, हरितालं नटमण्डनं, मनश्शिला कुनटी नाम धातुभेदः, गुञ्जा कृष्णला । आस्फोटो रक्तार्कः, काचं क्षारमृज्जो लवणभेदः । पिष्टमित्येकवचनं पूतिकरञ्जादिसमुदायविवक्षया, सामान्यविवक्षया च क्लीबत्वम् ।

सर्पकञ्चुको गवाश्वशकृद् अन्धाहिकाख्यमत्स्यशिर इति त्रयस्य धूपितस्य धूमोऽन्धङ्करण इत्याह — सर्पनिर्मोकमित्यादि । निर्मोकशब्दस्य नपुंसकत्वमार्षम् ।

पारावतादिषट्कमूत्रपुरीषं कासीसादित्रिकं कार्पासादित्रिकबीजानि गोमूत्रिकादिद्विकमूलं निम्बादिपञ्चकभङ्गः सर्पादिद्विकचर्म हस्तिसम्बन्धि नखशृङ्गचूर्णमित्येतेष्वेकैकस्य मदनकोद्रवपलालेन वा हस्तिकर्णपलाशपलालेन वा प्रधूपितस्य धूमः स्वसञ्चारसमकालमेव प्राणिनो मारयतीत्याह — पारावते-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कालीकुष्ठनडशतावरीमूलं सर्पप्रचलाककृकणपञ्चकुष्ठचूर्णं वा धूमः पूर्वकल्पेनार्द्रे शुष्कपलाले वा प्रणीतः सङ्ग्रामावतरणावस्कन्दनसंकुलेषु कृततेजनोदकाक्षिप्रतीकारैः प्रणीतः सर्वप्राणिनां नेत्रघ्नः ।

शारिकाकपोतबकबलाकालण्डमर्काक्षिपीलुकस्नुहिक्षीरपिष्टमन्धीकरणमञ्जनमुदकदूषणं च ।

यवकशालिमूलमदनफलजातीपत्रनरमूत्रयोगाः प्लक्षविदारीमूलयुक्तो मूकोदुम्बरमदनकोद्रवक्काथयुक्तो हस्तिकर्णपलाशक्काथयुक्तो वा मदनयोगः । शृङ्गिगौतमवृक्षकण्टकारमयूरपदीयोगो गुञ्जालाङ्गलीविषमूलिकेङ्गुदीयोगः करवीराक्षिपीलुकार्कमृगमारणीयोगो मदनको-

---

त्यादि । तत्र पारावतः कपोतः, प्लवकः पक्षिभेदः, क्रव्यादो गृध्रः । कासीसं धातुभेदः, हिङ्गु रामठं, यवतुषकणतण्डुलं शितशूकसम्बन्धी तुषकणतण्डुलानां समाहारः । कुटजो वृक्षभेदः, कोशातकी अपामार्गः । गोमूत्रिका तृणभेदः, भाण्डी योजनवल्ली । शिग्रुः शोभाञ्जनः, फणिज्जः जम्बीरभेदः, काक्षीवः शिग्रुविशेषः, पीलुको वृक्षभेदः ।

नेत्रघ्नं धूमयोगमाह — कालीत्यादि । तत्र काली अम्बष्ठा नडः पोटगलः, शतावरी शतमूली । प्रचलाकः मयूरबर्हः । पूर्वकल्पेन 'मदनकोद्रवपलालेन हस्तिकर्णपलाशपलालेन वेति पूर्वम् अभिहितेन प्रकारेण । पूर्वकल्केनेति पाठे अर्थश्चिन्त्यः । आर्द्रशुष्कपलालेन वेति क्वचित् पाठः । कृततेजनोदकाक्षिप्रतीकारैः कृतं स्वचक्षुर्घातपरिहाराय सज्जितं तेजनोदकं स्वबलोपघातप्रतीकारप्रकरणे वक्ष्यमाणं वृक्षविशेषोदकम् अक्षिप्रतीकारश्च अपरश्च तज्जातीयश्चक्षुरुपघातप्रतिविधिर्यैस्तथाभूतैः, अर्थात् प्रणेतृभिः ।

शारिकेत्यादि । तत्र शारिका गोराटी, बकः कह्वः बलाका बिसकण्ठिका । अर्कः अर्कपर्णाख्यौषधिः अक्षी वृक्षभेदो बिभीतकप्रकारः, स्नुहिः समन्तदुग्धा ।

मदनयोगानाह — यवकेत्यादि । तत्र यवकः तोयपर्णिका, शालिः कलमादिः, जातिः मालती, योगाः मिश्रणानि । प्लक्षः पिप्पलः । मूकम् आविलं जलम्, उदुम्बरो हेमदुग्धः । मदनयोगः चित्तविभ्रमकरो योगः । शृङ्गिगौतमेत्यादि । शृङ्गिगौतमं शृङ्ग्याख्यमत्स्याविशेषस्य भेदः, वृक्षः लोध्रः, कण्टकारः शाल्मलिवृक्षः, मयूरपदी ओषधिभेदः । लाङ्गली पृथक्पर्णी,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

द्रवकाथयुक्तो हस्तिकर्णपलाशक्काथयुक्तो वा मदनयोगः। समस्ता वा यवसेन्धनोदकदूषणाः।

कृतकण्डलकृकलासगृहगौलिकान्धाहिकधूमो नेत्रवधमुन्मादं च करोति।

कृकलासगृहगौलिकायोगः कुष्ठकरः।

स एव चित्रभेकान्त्रमधुयुक्तः प्रमेहमापादयति; मनुष्यलोहितयुक्तः शोषम्।

दूषीविषं मदनकोद्रवचूर्णमुपजिह्विकायोगः मातृवाहकाञ्जलिकारप्रचलाकभेकाक्षिपीलुकयोगो विषूचिकाकरः।

पञ्चकुष्ठककौण्डिन्यकराजवृक्षपुष्पमधुयोगो ज्वरकरः।

भासनकुलजिह्वाग्रन्थिकायोगः खरीक्षीरपिष्टो मूकबधिरकरो मासार्धमासिकः। कलामात्रं पुरुषाणामिति समानं पूर्वेण।

विषमूलिका कालकूटादिः, इङ्गुदी कटभी। मृगमारणी ओषधिभेदः। उक्ताः सर्व एवैते योगाः यवसेन्धनोदकानि दूषयन्तीत्याह — समस्ता वेत्यादि।

नेत्रघातोन्मादोभयहेतुं धूममाह — कृतकण्डलेत्यादि। कृता पक्का कण्डला रलयोरभेदात् कण्डरा स्नायुसंघातो येषां ते कृतकण्डलाः तथाभूतानां कृकलासगृहगौलिकान्धाहिकानां धूमः अर्थात् कृकलासादिस्नायुसंघाततापनोत्पन्नो धूमः, नेत्रवधम्, उन्मादं चित्तविभ्रमं च, करोति। कृतकण्डलेत्यादेरपरा व्याख्या — कृतकण्डलानां मिश्रितकपिकच्छूकानां कृकलासादीनां धूमः इति।

कृकलासेत्यादि। इह योगशब्दो योगजधूमपरः। कुष्ठं कोठम्।

स इत्यादि। स एव कृकलासगृहगौलिकायोग एव। आन्त्रं परीतत्। प्रमेहम् अतिमूत्रस्रावरोगम्। शोषं क्षयम्।

दूषीत्यादि। दूषीविषम् औषधाद्युपहतवीर्यं विषं, मदनकोद्रवचूर्णम्, उपजिह्विकायोगः वम्रीमिश्रणं, मातृवाहकाञ्जलिकारप्रचलाकभेकाक्षिपीलुकयोगः मातृवाहकः पक्षिभेदः अञ्जलिकारः ओषधिभेदः प्रचलाकभेकाक्षिपीलुका व्याख्याताः एषां योगः, विषूचिकाकरः।

पञ्चकुष्ठेत्यादि। तत्र राजवृक्ष आरग्वधः, पुष्पमधुः मधूकः।

भासनकुलेत्यादि। तत्र भासः शकुन्ताख्यः पक्षिविशेषः, जिह्वा

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भङ्गकाथोपनयनमौषधानां चूर्णं प्राणभृताम्। सर्वेषां वा काथोपनयनम्; एवं वीर्यवत्तरं भवति। इति योगसम्पत्।

शाल्मलीविदारीधान्यसिद्धो मूलवत्सनाभसंयुक्तश्चुचुन्दरीशोणितप्रलेपेन दिग्धो बाणो यं विध्यति, स विद्धोऽन्यान् दश पुरुषान् दशति; ते दष्टा दशान्यान् दशन्ति पुरुषान्।

भल्लातकयातुधानापामार्गबाणानां पुष्पैरेलकाक्षिगुग्गुलुहालाहलानां च कषायं बस्तनरशोणितयुक्तं दंशयोगः। ततोऽर्धधरणिको योगः सक्तुपिण्याकाभ्यामुदके प्रणीतो धनुश्शतायाममुदकाशयं दूषयति; मत्स्यपरम्परा ह्येतेन दष्टाभिमृष्टा वा विषीभवति; यश्चैतदुदकं पिबति स्पृशति वा।

मञ्जिष्ठासंज्ञं भेषजं, ग्रन्थिका पिप्पलीमूलम्, खरीक्षीरपिष्टः गर्दभीदुग्धसम्मिश्रितः, मूकबधिरकरो मासार्धमासिकः मासेनार्धमासेन वा मूकत्वबाधिरत्वयोरापादकः। योगानामुपयोक्तव्यपरिमाणं तु 'कलामात्रं पुरुषाणां द्विगुणः खराश्वानां चतुर्गुणं हस्त्युष्ट्राणाम्' इति पूर्वोक्तेन परिमाणेन समानमित्याह— **कलामात्रमित्यादि**।

उक्तेषु योगेष्वौषधानां यथास्वं भङ्गकाथेन साधनं प्राणिनां चूर्णनं च कार्यमित्याह— **भङ्गेत्यादि**। उभयेषामपि क्वाथोपनयनपक्षमाह— **सर्वेषां वेत्यादि**। क्वाथसाधितस्य वीर्यातिशयमाह— **एवं वीर्यवत्तरमिति**। **इति योगसम्पदिति**। निरूपितेति शेषः।

औषधवीर्यमाह— **शाल्मलीत्यादि**। तत्र धान्यं कुस्तुम्बुरु। मूलं पिप्पलीमूलं, वत्सनाभो विषभेदः। चुचुन्दरी उग्रविषो मूषिकभेदः। दिग्धो लिप्तः।

अन्यं दंशयोगमाह— **भल्लातकेत्यादि**। तत्र बाणोऽर्जुनवृक्षः। पुष्पैः, साधितमिति शेषः। एलकः त्वग्गन्धाख्यो वृक्षः। **दंशयोग इति**। उक्तकषायोपयोगः पूर्ववद् बहुपुरुषदंशनोपायो भवतीत्यर्थः। तस्य वीर्यमाह— **तत इत्यादि**। तत उक्तात् कषायात्। अर्धधरणिकः रूप्यमाषकाष्टकप्रमाणः। सक्तुपिण्याकाभ्यां सक्तुना धानाचूर्णेन पिण्याकेन तिलकल्केन च सह। एतेन उक्तदंशयोगदूषितेन। विषीभवति विषतां प्रतिपद्यते। विषीभ-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रक्तश्वेतसर्षपैर्गोधा त्रिपक्षमुष्ट्रिकायां भूमौ निखातायां निहिता वध्येनोद्धृता यावत् पश्यति, तावन्मारयति । कृष्णः सर्पो वा ।

विद्युत्प्रदग्धोऽङ्गारोऽज्वालो वा विद्युत्प्रदग्धैः काष्ठैर्गृहीतश्चानुवासितः कृत्तिकासु भरणीषु वा रौद्रेण कर्मणाभिहुतोऽग्निः प्रणीतश्च निष्प्रतीकारो दहति ।

कर्मारादग्निमाहृत्य क्षौद्रेण जुहुयात् पृथक् ।
सुरया शौण्डिकादग्निं भार्यायोऽग्निं घृतेन च ॥
माल्येन चैकपत्न्यग्निं पुंश्चल्यग्निं च सर्षपैः ।
दध्ना च सूतिकास्वग्निमाहिताग्निं च तण्डुलैः ॥

वन्तीति बहुवचनान्तपाठे कर्तृपदं बहुवचनान्तं छेत्तव्यम् । **यश्चेत्यादि** । यो वा एतदुदकं पिबति स च विषीभवतीत्यर्थः ।

निहाका नाम जलजन्तुः श्वेतैश्च रक्तैश्च सर्षपैः सह पञ्चचत्वारिंशतं दिवसान् मृद्भाण्डविशेषे भूमौ खात्वा स्थापिता पश्चाद् वध्यपुरुषेणोद्धृता सती यावत् तामुद्धर्ता पश्यति तावत् तं मारयतीत्याह — **रक्तश्वेतेत्यादि** । **कृष्णः सर्पो वेति** । सोऽपि रक्तश्वेतसर्षपैः त्रीन् पक्षान् उष्ट्रिकायां भूखातस्थापितायां निहितो वध्येनोद्धृतो यावत् तमुद्धर्ता पश्यति तावन्मारयतीत्यर्थः ।

निष्प्रतीकारमाग्नेयं योगमाह — **विद्युत्प्रदग्ध इत्यादि** । विद्युत्प्रदग्धेन्धनस्थो निर्ज्वालस्तद्वैद्युताग्निर्विद्युत्प्रदग्धैः काष्ठैर्गृहीत्वाभिवर्धितः कृत्तिकायुक्ते भरणीयुक्ते वा काले रुद्रदेवताकेन कर्मणा कृतहोमः परदुर्गादिषु प्रयुक्तोऽशक्यप्रतिक्रियो दाह्यं दहतीत्यर्थः । कर्मानुष्ठानक्रमस्तु सम्प्रदायादवगन्तव्यः ।

योगान्तरं श्लोकचतुष्टयेनाह — **कर्मारादित्यादिना** । **कर्माराद्** वेणोर्वेण्वन्तरसंघृष्टाद्, **अग्निम् आहृत्य, क्षौद्रेण** माक्षिकेण, **पृथग् जुहुयात्** । वक्ष्यमाणाग्निभ्यः पार्थक्येनावस्थापिते तस्मिन् होमं कुर्यात् । पृथगित्युत्तरेष्वपि संबध्यते । **शौण्डिकाद् अग्निम् आहृत्य, सुरया** मद्येन, **जुहुयात्** । अयोग्निम् अयश्शब्देनायस्कारलक्षणाद् अयस्कारसकाशादाहृतमग्निमित्यर्थः, भार्या ब्राह्मणयष्टिकाख्ययौषध्या, **घृतेन च जुहुयात्** । **एकपत्न्यग्निं** पतिव्रतासकाशादाहृतमग्निं, **माल्येन** जुहुयात् । **पुंश्चल्यग्निं** पुंश्चली बन्धकी तदीयमग्निं, **सर्षपैः** जुहुयात् । **सूतिकासु**, विद्यमानमाहृतमिति शेषः, अग्निं **दध्ना**

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

चण्डालाग्निं च मांसेन चिताग्निं मानुषेण च ।
समस्तान् बस्तवसया मानुषेण ध्रुवेण च ॥
जुहुयादग्निमन्त्रेण राजवृक्षकदारुभिः ।
एष निष्प्रतिकारोऽग्निर्द्विषतां नेत्रमोहनः ॥

अदिते! नमस्ते; अनुमते! नमस्ते; सरस्वति! नमस्ते; देव! सवितर्नमस्ते । अग्नये स्वाहा; सोमाय स्वाहा; भूः स्वाहा; भुवः स्वाहा ।

इति कौटलीयार्थशास्त्रे औपनिषदिके चतुर्दशाधिकरणे
प्रथमोऽध्यायः परघातप्रयोगः, आदितः
षट्चत्वारिंशदुत्तरशततमः ॥

जुहुयात् । आहिताग्निम् आहिताग्निसम्बन्धिनमग्निमित्यर्थः, तण्डुलैः, जुहुयात् । चण्डालाग्निं चण्डालादाहृतमग्निं, मांसेन जुहुयात् । चिताग्निं शवाचित्याग्निं, मानुषेण जुहुयात् । समस्तान् व्यस्तान् पूर्वोक्तरीत्या पृथक् पृथगभिहुतान् नवविधान् अग्नीन् एकीकृतानित्यर्थः, बस्तवसया मेषवपया, मानुषेण, ध्रुवेण च वटेन च, राजवृक्षकदारुभिः आरग्वधकाष्ठैः, अग्निमन्त्रेण अग्निस्तावकमन्त्रेण सम्प्रदायाधिगन्तव्येन, जुहुयात् । एषोऽग्निः द्विषतां नेत्रमोहनः, एनमग्निं स्वदुर्गादिषु देदीप्यमानं शत्रवो न केवलं प्रतिकर्तुमशक्ताः, किन्तु तद्दर्शनान्मौढ्यमपि प्रतिपद्यन्त इत्यर्थः ।

मन्त्रैकदेशं दर्शयति — अदिते! नमस्ते इत्यादि ॥

इति कौटलीयार्थशास्त्रव्याख्यायाम् औपनिषदिके चतुर्दशेऽधिकरणे प्रथमोऽध्यायः परघातप्रयोगः,
आदितः षट्चत्वारिंशच्छततमः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

१७८. प्रक. प्रलम्भने अद्भुतोत्पादनम्।

शिरीषोदुम्बरशमीचूर्णं सर्पिषा संहृत्यार्धमासिकक्षुद्योगः।

कशेरुकोत्पलकन्देक्षुमूलबिसदूर्वाक्षीरघृतमण्डसिद्धो मासिकः।

माषयवकुलत्थदर्भमूलचूर्णं वा क्षीरघृताभ्यां, वल्लीक्षीरघृतं वा समसिद्धं सालपृश्निपर्णीमूलकल्कं पयसा पीत्वा, पयो वा तत्सिद्धं मधुघृताभ्यामशित्वा, मासमुपवसति।

श्वेतबस्तमूत्रे सप्तरात्रोषितैः सिद्धार्थकैः सिद्धं तैलं कटुकालाबौ मासार्धमासस्थितं चतुष्पदद्विपदानां विरूपकरणम्।

तक्रयवभक्षस्य सप्तरात्रादूर्ध्वं श्वेतगर्दभस्य लण्डयवैः सिद्धं गौरसर्षपतैलं विरूपकरणम्।

प्रलम्भनमिति सूत्रम्। औषधमन्त्रप्रयोगद्वारा क्षुत्प्रतीकारविरूपकरणादिना शत्रुवञ्चनमुच्यत इति सूत्रार्थः। अद्भुतोत्पादनं भैषज्यमन्त्रप्रयोगः इति द्विधा विभज्य प्रकरणमिदमध्यायद्वयेन वितन्यते। अद्भुतं पक्षोपवासमासोपवासादिकम्।

तत्र पक्षोपवासानुकूलं योगमाह — शिरीषेत्यादि। शिरीषः कपीतनः, उदुम्बरो जन्तुफलाख्यो वृक्षः, शमी सक्तुफला। संहृत्य संयोज्य।

मासोपवासयोगमाह — कशेरुकेत्यादि। तत्र कशेरुकं वृष्यकन्दम्, उत्पलकन्दः कुवलयकन्दः, बिसं मृणालं, दूर्वा सहस्रवीर्या, मण्डः रसाग्रः।

मासोपवासयोगस्य प्रकारान्तराण्याह — माषयवेत्यादि। माषादिचतुष्टयचूर्णं क्षीरघृताभ्यां मिश्रितं पीत्वेत्येकः प्रकारः, वल्लीक्षीरघृतं समप्रमाणसिद्धं पीत्वेति द्वितीयः, सालपृश्निपर्णीमूलकल्कं पयसा मिश्रं पीत्वेति तृतीयः, पृश्निपर्णीमूलकल्कैः सह क्वाथसाधितं क्षीरं मधुघृताभ्यां मिश्रितं पीत्वेति चतुर्थः। तत्र माषो मलदः, यवो दीर्घशूकः, कुलत्थो धान्यभेदः क्वचित् कुलस्थेति पाठः। दर्भः अश्ववालः। वल्ली अजमोदकः। सालः अर्जुनः, पृश्निपर्णी लाङ्गली, कल्कः द्रवाधश्चूर्णम्।

विरूपकरणयोगमाह—श्वेतबस्तमूत्र इत्यादि। सिद्धार्थकैः सर्षपैः। कटुकालाबौ कटुतुम्ब्याम्।

तस्य प्रकारान्तरमाह — तक्रेत्यादि। तक्रयवौ सप्तरात्रं भक्षयितुः पश्चाद् धवलगर्दभस्य विष्ठाभिर्यवैश्च सह पक्वं गौरसर्षपतैलमशित वैरूप्यकारकं भवतीत्यर्थः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

एतयोरन्यतरस्य मूत्रलण्डरससिद्धं सिद्धार्थकतैलमर्कतूलपतङ्ग-चूर्णप्रतिवापं श्वेतीकरणम् ।

श्वेतकुक्कुटाजगरलण्डयोगः श्वेतीकरणम् ।

श्वेतबस्तमूत्रे श्वेतसर्षपाः सप्तरात्रोषितास्तक्रमर्कक्षीरमर्कतूलकटु-कमत्स्यविलङ्गाश्च । एष पक्षस्थितो योगः श्वेतीकरणम् ।

समुद्रमण्डूकीशङ्खसुधाकदलीक्षारतक्रयोगः श्वेतीकरणम् ।

कदल्यवल्गुजक्षाररसशुक्ताः सुरायुक्तास्तक्रार्कतूलस्नुहिलवणं धान्याम्लं च पक्षस्थितो योगः श्वेतीकरणम् ।

कटुकालाबौ वल्लीगते नगरमर्धमासस्थितं गौरसर्षपपिष्टं रोम्णां श्वेतीकरणम् ।

अर्कतूलोऽर्जुने कीटः श्वेता च गृहगौलिका ।
एतेन पिष्टेनाभ्यक्ताः केशाः स्युः शङ्खपाण्डराः ॥

श्वेतीकरणमाह — एतयोरित्यादि । एतयोः श्वेतबस्तश्वेतगर्दभयोः । अर्कतूलपतङ्गचूर्णप्रतिवापम् अर्कः धुस्तूरः तूलं ब्रह्मकाष्ठकं पतङ्गः शालिः एतेषां चूर्णं प्रतिवापः प्रतिवपन्ति प्रतिसर्जयन्ति प्रतियोजयन्त्यन्येनैनमिति व्युत्पत्त्या प्रतियोजनीयमौषधं यस्य तत् तथाभूतम् ।

श्वेतीकरणस्य प्रकारान्तरमाह — श्वेतकुक्कुटेत्यादि । धवलकृकवाकुशयुविष्ठायोगः श्वैत्यकारक इत्यर्थः ।

अन्यं प्रकारमाह — श्वेतबस्तमूत्र इत्यादि । श्वेतच्छागमूत्रे सप्तरात्रवासिताः श्वेतसर्षपाः उदश्वित् धुस्तूरदुग्धम्, अर्कवृक्ष-ब्रह्मकाष्ठक-पटोल-मत्स्य-कृमिघ्नाख्यौषधिभेदाश्चैतेषां योगः पञ्चदशरात्रास्थितः श्वेतीकारक इत्यर्थः ।

प्रकारान्तरमाह — समुद्रमण्डूकीत्यादि । तत्र सुधा मूर्वाख्यौषधिः क्षारो लवणभेदः ।

प्रकारान्तरमाह — कदल्यवल्गुजेत्यादि । तत्र अवल्गुजः सोमराजी, क्षारो लवणभेदः, रसः पारदः, शुक्तः पूतिपरुषाम्लः, कन्दमूलफलाद्यभिषवजद्रव्यं वा । धान्याम्लं काञ्जिकम् ।

लोमश्वेतीकरणमाह—कटुकेत्यादि । कटुकालाबौ कटुतुम्ब्याम् । वल्लीगते तल्लताया अव्यपवृक्ते । नागरं शुण्ठी नगरमिति ह्रस्वादिकमेव तु पठ्यते ।

अपरं लोमश्वेतीकरणयोगं श्लोकेनाह — अर्कतूल इत्यादि । अर्जुने

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

गोमयेन तिन्दुकारिष्टकल्केन वा मर्दिताङ्गस्य भल्लातकरसानुलिप्तस्य मासिकः कुष्ठयोगः ।

कृष्णसर्पमुखे गृहगौलिकामुखे वा सप्तरात्रोषिता गुञ्जाः कुष्ठयोगः ।

शुकपित्ताण्डरसाभ्यङ्गः कुष्ठयोगः ।

कुष्ठस्य प्रियालकल्ककषायः प्रतीकारः ।

कुक्कुटीकोशातकीशतावरीमूलयुक्तमाहारयमाणो मासेन गौरो भवति ।

वटकषायस्नातः सहचरकल्कदिग्धः कृष्णो भवति ।

शकुनकङ्गुतैलयुक्ता हरितालमनश्शिलाः श्यामीकरणम् ।

खद्योतचूर्णं सर्षपतैलयुक्तं रात्रौ ज्वलति ।

ककुभवृक्षो यवसं चेत्यर्जुनद्वयम् । कीटः इह विशेषग्रहणं सम्प्रदायादवगन्तव्यम् । एतेन अर्कतूलादिसमुदायेन ।

कुष्ठरोगोत्पादहेतुं योगमाह — **गोमयेनेत्यादि** । तत्र तिन्दुकः कालस्कन्धः, अरिष्टो निम्बः ।

कुष्ठयोगस्य प्रकारान्तरमाह — **कृष्णसर्पमुख इत्यादि** ।

प्रकारान्तरमाह — **शुकेत्यादि** । शुकपित्ताण्डरसाभ्यङ्गः शुकस्य मायुना अण्डरसेन चाङ्गानुलेपनम् ।

कुष्ठस्य प्रतीकारमाह — **कुष्ठस्येत्यादि** । प्रियालकल्ककषायः प्रियालस्य राजादनाख्यस्य वृक्षस्य कल्केन कषायः ।

गौरत्वापादकं योगमाह — **कुक्कुटीत्यादि** । तत्र कोशातकी पटोली, शतावरी शतमूली ।

कृष्णयोगमाह — **वटकषायस्नात इत्यादि** । सहचरकल्कादिग्धः सहचरस्य अन्यथापरनाम्नः कुरवकस्य कल्केन स्नातः ।

तस्य प्रकारान्तरमाह — **शकुनेत्यादि** । तत्र शकुनो गृध्रः, कङ्गुः प्रियङ्गुः । हरितालो नटमण्डनं, मनश्शिला कुनटी ।

योगविशेषमाह — **खद्योतेत्यादि** । खद्योतो ज्योतिरिङ्गणः तस्य चूर्णं खद्योतचूर्णम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

खद्योतगण्डूपदचूर्णं समुद्रजन्तूनां भृङ्गकपालानां खदिरकर्णिकाराणां पुष्पचूर्णं वा शकुनकङ्गुतैलयुक्तं तेजनचूर्णम् पारिभद्रकत्वङ्मषी मण्डूकवसया युक्ता गात्रप्रज्वालनमग्निना ।

पारिभद्रकत्वग्वज्रकदलीतिलकल्कप्रदिग्धं शरीरमग्निना ज्वलति ।

पीलुत्वङ्मषीमयः पिण्डो हस्ते ज्वलति । मण्डूकवसादिग्धोऽग्निना ज्वलति ।

तेन प्रदिग्धमङ्गं कुशाम्रफलतैलसिक्तं समुद्रमण्डूकीफेनकसर्जरसचूर्णयुक्तं वा ज्वलति ।

मण्डूकवसासिद्धेन पयसा कुलीरादीनां वसया समभागं तैलं

शरीरे तदबाधेनाग्नेः प्रज्वलनानुकूलान् योगानाह — खद्योतेत्यादि । खद्योतगण्डूपदचूर्णं ज्योतिरिङ्गणकिञ्चुलुकयोश्चूर्णं, समुद्रजन्तूनाम् इह विशेषग्रहणं सम्प्रदायाद् विज्ञेयम् । भृङ्गकपालानां भृङ्गः कलिङ्गाख्यः पक्षी कपालाः शिरोस्थीनि तेषां, चूर्णमित्यार्थम् । खदिरकर्णिकाराणां खदिराणां दन्तधावनाख्यानां वृक्षाणां कर्णिकाराणां वृक्षोत्पलानां च, पुष्पचूर्णं वा, शकुनकङ्गुतैलयुक्तं गृध्रप्रियङ्गुतैलयुक्तं, तेजनचूर्णं वेणुचूर्णम् अर्थात् तथाभूतं, पारिभद्रकत्वङ्मषी निम्बत्वङ्मषी, मण्डूकवसया युक्ता । एतेष्वेकैकमिति शेषः । अग्निना गात्रप्रज्वालनम् एतेष्वेकैकं गात्रेऽनुलिप्तं गात्रस्य पीडां विनैवाग्निप्रज्वलनसाधनमित्यर्थः ।

पारिभद्रेत्यादि । तत्र वज्रं श्रीवेरम् ।

पीलिवत्यादि । पिण्डः बोलाख्यं भेषजम् । हस्ते ज्वलति विनाप्यग्नियोगमित्यर्थः प्रतीयते, उत्तरवाक्ये मण्डूकवसादिग्धस्य पिण्डस्याग्निना ज्वलनवचनात् ।

तेन प्रदिग्धमित्यादि । तेन पिण्डेन । कुशाम्रफलतैलसिक्तं कुशतैलाम्रफलतैलाभ्यां सिक्तम् । समुद्रमण्डूकीफेनकसर्जरसचूर्णयुक्तं वा समुद्रमण्डूकीसमुद्रफेनकयक्षधूपचूर्णैर्युक्तं वा ।

मण्डूकेत्यादि । मण्डूकवसासिद्धेन मण्डूकवसया सह पेकन, पयसा क्षीरेण, मिश्रमिति शेषः, कुलीरादीनां वसया, इहापि मिश्रमिति शेषः, समभागं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सिद्धमभ्यङ्गो गात्राणामग्निप्रज्वालनम् । मण्डूकवसादिग्धोऽग्निना ज्वलति ।

वेणुमूलशैवललिप्तमङ्गं मण्डूकवसादिग्धमग्निना ज्वलति ।

पारिभद्रकप्रतिबलावञ्जुलवज्रकदलीमूलकल्केन मण्डूकवसादिग्धेन तैलेनाभ्यक्तपादोऽङ्गारेषु गच्छति ।

उपोदका प्रतिबला वञ्जुलः पारिभद्रकः ।
एतेषां मूलकल्केन मण्डूकवसया सह ॥
साधयेत् तैलमेतेन पादावभ्यज्य निर्मलौ ।
अङ्गारराशौ विचरेद् यथा कुसुमसञ्चये ॥

हंसक्रौञ्चमयूराणाम् अन्येषां वा महाशकुनीनाम् उदकप्लवानां पुच्छेषु बद्धा नलदीपिका रात्रावुल्कादर्शनम् ।

वैद्युतं भस्माग्निशमनम् ।

स्त्रीपुष्पपायिता माषा व्रजकुलीमूलं मण्डूकवसामिश्रं चुल्ल्यां दीप्तायामपाचनम् । चुल्लीशोधनं प्रतीकारः ।

पयोवसातुल्यप्रमाणं, तैलं, सिद्धम्, अभ्यङ्गः अभ्यज्यमानमित्यर्थः, गात्राणाम् अग्निप्रज्वालनम् । मण्डूकवसादिग्धः अर्थादुक्ततैलाभ्यक्तः, अग्निना ज्वलति ।

वेणुमूलेत्यादि । तत्र शैवलं जलनीली ।

पारिभद्रकेत्यादि । तत्र प्रतिबला ओषधिभेदः ।

अङ्गारराशिपादचारयोगं श्लोकाभ्यामाह — उपोदकेत्यादि । उपोदका सुताह्व ओषधिभेदः । अपोदकेति मत्स्यकालीनाम्ना काचिदोषधिरपरा क्षीरस्वामिनोक्ता ॥

उल्काप्रदर्शनमाह — हंसेत्यादि । उदकप्लवानां जले प्लवमानानां कारण्डवादीनाम् । नलदीपिका नलस्तृणविशेषस्तत्र योजिता दीपिका । उल्कादर्शनं रक्षःपिशाचादिभावितमलातमुल्का तद्दर्शनमिव नलदीपिकाया दूराद् दर्शनं नराणां भीतिं जनयतीत्यर्थः ।

वैद्युतमिति । विद्युद्दग्धकाष्ठजं, भस्म, अग्निप्रशमनम् ।

स्त्रीपुष्पपायिता इति । स्त्रीरजोवासिताः, माषाः, मण्डूकवसामिश्रं, व्रजकुलीमूलं गोष्ठोत्पन्नाया हिङ्गुद्याः मूलं च, चुल्ल्यां दीप्तायां प्रज्वलन्त्या-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

खद्योतगण्डूपदचूर्णं समुद्रजन्तूनां भृङ्गकपालानां खदिरकार्णिकाराणां पुष्पचूर्णं वा शकुनकङ्गुतैलयुक्तं तेजनचूर्णम् पारिभद्रकत्वङ्मषी मण्डूकवसया युक्ता गात्रप्रज्वालनमग्निना ।

पारिभद्रकत्वग्वज्रकदलीतिलकल्कप्रदिग्धं शरीरमग्निना ज्वलति ।

पीलुत्वङ्मषीमयः पिण्डो हस्ते ज्वलति । मण्डूकवसादिग्धोऽग्निना ज्वलति ।

तेन प्रदिग्धमङ्गं कुशाम्रफलतैलसिक्तं समुद्रमण्डूकीफेनकसर्जरसचूर्णयुक्तं वा ज्वलति ।

मण्डूकवसासिद्धेन पयसा कुलीरादीनां वसया समभागं तैलं

शरीरे तदबाधेनाग्नेः प्रज्वलनानुकूलान् योगानाह — खद्योतेत्यादि । खद्योतगण्डूपदचूर्णं ज्योतिरिङ्गणकिञ्चुलकयोश्चूर्णं, समुद्रजन्तूनाम् इह विशेषग्रहणं सम्प्रदायाद् विज्ञेयम् । भृङ्गकपालानां भृङ्गः कलिङ्गाख्यः पक्षी कपालाः शिरोस्थीनि तेषां, चूर्णमित्यार्थम् । खदिरकर्णिकाराणां खदिराणां दन्तधावनाख्यानां वृक्षाणां कर्णिकाराणां वृक्षोत्पलानां च, पुष्पचूर्णं वा, शकुनकङ्गुतैलयुक्तं गृध्रप्रियङ्गुतैलयुक्तं, तेजनचूर्णं वेणुचूर्णम् अर्थात् तथाभूतं, पारिभद्रकत्वङ्मषी निम्बत्वङ्मषी, मण्डूकवसया युक्ता । एतेष्वेकैकमिति शेषः । अग्निना गात्रप्रज्वालनम् एतेष्वेकैकं गात्रेऽनुलिप्तं गात्रस्य पीडां विनैवाग्निप्रज्वलनसाधनमित्यर्थः ।

पारिभद्रेत्यादि । तत्र वज्रं श्रीवेरम् ।

पीलित्यादि । पिण्डः बोलाख्यं भेषजम् । हस्ते ज्वलति विनाप्यग्नियोगमित्यर्थः प्रतीयते, उत्तरवाक्ये मण्डूकवसादिग्धस्य पिण्डस्याग्निना ज्वलनवचनात् ।

तेन प्रदिग्धमित्यादि । तेन पिण्डेन । कुशाम्रफलतैलसिक्तं कुशतैलाम्रफलतैलाभ्यां सिक्तम् । समुद्रमण्डूकीफेनकसर्जरसचूर्णयुक्तं वा समुद्रमण्डूकीसमुद्रफेनकयक्षधूपचूर्णैर्युक्तं वा ।

मण्डूकेत्यादि । मण्डूकवसासिद्धेन मण्डूकवसया सह पक्वेन, पयसा क्षीरेण, मिश्रमिति शेषः, कुलीरादीनां वसया, इहापि मिश्रमिति शेषः, समभागं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सिद्धमभ्यङ्गो गात्राणामग्निप्रज्वालनम् । मण्डूकवसादिग्धोऽग्निना ज्वलति ।

वेणुमूलशैवललिप्तमङ्गं मण्डूकवसादिग्धमग्निना ज्वलति ।

पारिभद्रकप्रतिबलावञ्जुलवज्रकदलीमूलकल्केन मण्डूकवसादिग्धेन तैलेनाभ्यक्तपादोऽङ्गारेषु गच्छति ।

उपोदका प्रतिबला वञ्जुलः पारिभद्रकः ।
एतेषां मूलकल्केन मण्डूकवसया सह ॥
साधयेत् तैलमेतेन पादावभ्यज्य निर्मलौ ।
अङ्गारराशौ विचरेद् यथा कुसुमसञ्चये ॥

हंसक्रौञ्चमयूराणाम् अन्येषां वा महाशकुनीनाम् उदकप्लवानां पुच्छेषु बद्धा नलदीपिका रात्रावुल्कादर्शनम् ।

वैद्युतं भस्माग्निशमनम् ।

स्त्रीपुष्पपायिता माषा व्रजकुलीमूलं मण्डूकवसामिश्रं चुल्ल्यां दीप्तायामपाचनम् । चुल्लीशोधनं प्रतीकारः ।

पयोवसातुल्यप्रमाणं, तैलं, सिद्धम्, अभ्यङ्गः अभ्यज्यमानमित्यर्थः, गात्राणाम् अग्निप्रज्वालनम् । मण्डूकवसादिग्धः अर्थादुक्ततैलाभ्यक्तः, अग्निना ज्वलति ।

वेणुमूलेत्यादि । तत्र शैवलं जलनीली ।

पारिभद्रकेत्यादि । तत्र प्रतिबला ओषधिभेदः ।

अङ्गारराशिपादचारयोगं श्लोकाभ्यामाह— उपोदकेत्यादि । उपोदका सुताह्व ओषधिभेदः । अपोदकेति मत्स्यकालीनाम्ना काचिदोषधिरपरा क्षीरस्वामिनोक्ता ॥

उल्काप्रदर्शनमाह — हंसेत्यादि । उदकप्लवानां जले प्लवमानानां कारण्डवादीनाम् । नलदीपिका नलस्तृणविशेषस्तत्र योजिता दीपिका । उल्कादर्शनं रक्षःपिशाचादिभावितमलातमुल्का तद्दर्शनमिव नलदीपिकाया दूराद् दर्शनं नराणां भीतिं जनयतीत्यर्थः ।

वैद्युतमिति । विद्युद्दग्धकाष्ठजं, भस्म, अग्निप्रशमनम् ।

स्त्रीपुष्पपायिता इति । स्त्रीरजोवासिताः, माषाः, मण्डूकवसामिश्रं, व्रजकुलीमूलं गोष्ठोत्पन्नाया हिङ्गुद्याः मूलं च, चुल्ल्यां दीप्तायां प्रज्वलन्त्या-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पीलुमयो मणिरग्निगर्भः सुवर्चलामूलग्रन्थिः सूत्रग्रन्थिर्वा पिचुपरिवेष्टितो मुखादग्निधूमोत्सर्गः ।

कुशाम्रफलतैलसिक्तोऽग्निर्वर्षप्रवातेषु ज्वलति ।

समुद्रफेनकस्तैलयुक्तोऽम्भसि प्लवमानो ज्वलति ।

प्लवङ्गमानामस्थिषु कल्माषवेणुना निर्मथितोऽग्निर्नोदकेन शाम्यति, उदकेन च ज्वलति ।

शस्त्रहतस्य शूलप्रोतस्य वा पुरुषस्य वामपार्श्वपर्शुकास्थिषु कल्माषवेणुना निर्मथितोऽग्निः, स्त्रियाः पुरुषस्य वास्थिषु मनुष्यपर्शुकया निर्मथितोऽग्निर्यत्र त्रिरपसव्यं गच्छति, न चात्रान्योऽग्निर्ज्वलति ।

चुचुन्दरी खञ्जरीटः खारकीटश्च पिष्यते ।
अश्वमूत्रेण संसृष्टा निगलानां तु भञ्जनम् ॥

अयस्कान्तो वा पाषाणः ।

मपि चुल्ल्याम्, अपाचनं पाचनहीनं भवति, ते च तच्च पाकं न प्राप्नुवन्तीत्यर्थः । **चुल्लीशोधनमिति** । चुल्ल्या अवतार्य तेषां शुचीकरणं, प्रतीकारः ।

पील्वित्यादि । पीलुमयो मणिः पीलुदारुनिर्मितम् अलिञ्जरम्, अग्निगर्भः अन्तर्गताग्निः, सुवर्चलामूलग्रन्थिः क्षुमामूलग्रन्थिः, सूत्रग्रन्थिर्वा क्षुमासूत्रग्रन्थिर्वा, पिचुपरिवेष्टितः निरस्थितूलवेष्टितः, मुखाद्, अग्निधूमोत्सर्गः अग्न्युत्सर्गस्य धूमोत्सर्गस्य च साधनमित्यर्थः ।

कुशाम्रेत्यादि । वर्षप्रवातेषु वृष्टिषु महावातेषु च । ज्वलति न निर्वाति ।

समुद्रफेनक इत्यादि । स्पष्टार्थम् ।

प्लवेत्यादि । प्लवङ्गमानां मर्कटानाम् ।

शस्त्रहतस्येत्यादि । शूलप्रोतस्य शूलप्रवेशितदेहस्य । वामपार्श्वपर्शुकास्थिषु वामपार्श्वगतेषु पर्शुकाशब्दवाच्येषु अस्थिषु । यत्र प्रदेशे ।

निगलभञ्जनयोगं श्लोकेनाह — **चुचुन्दरीत्यादि** । **खञ्जरीटः** खञ्जनः । **खारकीटः** ऊषभूमिजः कीटः । **पिष्यते** प्रत्येकम् । **संसृष्टाः** पिष्टाश्चुचुन्दर्यादय एकीकृताः । **भञ्जनं** भञ्जनसाधनम् ॥

अयस्कान्तो वा पाषाण इति । निगलानां भञ्जनमिति वर्तते ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कुलीराण्डदर्दुरखारकीटवसापदेहेन द्विगुणो दारकगर्भः कङ्कभासपार्श्वोत्पलोदकपिष्टश्चतुष्पदद्विपदानां पादलेपः; उलूकगृध्रवसाभ्यामुष्ट्रचर्मोपानहावभ्यज्य वटपत्रैः प्रतिच्छाद्य पञ्चाशद्योजनान्यश्रान्तो गच्छति । श्येनकङ्ककाकगृध्रहंसक्रौञ्चवीचिरल्लानां मज्जानो रेतांसि वा योजनशताय । सिंहव्याघ्रद्वीपिकाकोलूकानां मज्जानो रेतांसि वा सार्ववर्णिकानि गर्भपतनान्युष्ट्रिकायामभिषूय श्मशाने प्रेतशिशून् वा तत्समुत्थितं मेदो योजनशताय ॥

अनिष्टैरद्भुतोत्पातैः परस्योद्वेगमाचरेत् ।
आराज्यायेति निर्वादः समानः कोप उच्यते ॥

इति कौटलीयार्थशास्त्रे औपनिषदिके चतुर्दशाधिकरणे
द्वितीयोऽध्यायः प्रलम्भने अद्भुतोत्पादनम्,
आदितः सप्तचत्वारिंशच्छततमः ॥

अयोमणयो हि बहुप्रकाराः, कश्चिदयश्चुम्बति कश्चिदयो भ्रामयति कश्चिदयो भनक्ति । तत्र भञ्जकोऽयस्कान्तविशेष इह ग्राह्यः, आयस्कान्त इति दीर्घादिः क्वचित् पठ्यते ।

पञ्चाशद्योजनाश्रान्तगमनयोगमाह — कुलीराण्डेत्यादि । द्विगुणो घनतां प्रतिपन्नः । दारकगर्भः सूकरगर्भः । कङ्केत्यादिपदे उत्पलो मत्स्यभेदः । पादलेपः पादलेपनसाधनम् । उष्ट्रचर्मोपानहौ उष्ट्रचर्ममय्यौ पादरक्षिण्यौ । योजनशतगमनयोगमाह — श्येनकङ्केत्यादि । तत्र वीचिरल्लः तरङ्गाकारकम्बलरेखाङ्कः प्राणीति व्याख्येयम् । क्वचित् चिरल्लानामिति पठ्यते । तत्र रेफस्य लेखकप्रमादकृतत्वे चिल्ल आतायी नाम पक्षीति व्याख्येयम् । मज्जानो वसाः । योजनशताय योजनशतगमनाय । कल्पन्त इति शेषः । प्रकारान्तरमाह — सिंहव्याघ्रेत्यादि । सार्ववर्णिकानि ब्राह्मणादिसर्ववर्णभवानि । गर्भपतनानि पतितान् गर्भान् । उष्ट्रिकायां मृद्भाण्डविशेषे । अभिषूय अभिषवविधिना सारं गृहीत्वा । प्रेतशिशून् वा अभिषूयेति सम्बध्यते । मेदः पलतेजः ॥

श्लोकेनाध्यायमुपसंहरति — अनिष्टैरिति । इति उक्तप्रकारैः, अद्भुतोत्पातैः आश्चर्यकरैरुपप्लवैः, परस्य शत्रोः, उद्वेगं भयम्, आराज्याय तद राजत्वाय, आचरेद् उत्पादयेत् । स चायं डिम्बप्रवर्तनलक्षणो व्यापारः कल-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ङ्कहेतुभूतोऽपि किमर्थमुपदिश्यत इत्याह — निर्वाद इति । निर्वादः कलङ्कः लक्षणया तद्धेतुभूतो डिम्बप्रवर्तनलक्षणो व्यापारः, कोपे सति समानः विजिगीषुपरयोस्तुल्यः अन्योन्यमुद्दिश्यानुष्ठानविषयः, रागवशादेकस्य डिम्बप्रवृत्तावन्यस्यापि तत्प्रतिविधित्सोः सा भवत्येवावर्जनीयेत्यभिप्रायः। अत एव उच्यते व्युत्पाद्यते ॥

इति कौटलीयार्थशास्त्रव्याख्यायाम् औपनिषदिके चतुर्दशेऽधिकरणे
द्वितीयोऽध्यायः प्रलम्भनेऽद्भुतोत्पादनम्,
आदितः सप्तचत्वारिंशच्छततमः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

१७८. प्रक. प्रलम्भने भैषज्यमन्त्रप्रयोगः ।

मार्जारोष्ट्रवृकवराहश्वाविद्वागुलीनप्तृकाकोलूकानाम् अन्येषां वा निशाचराणां सत्त्वानामेकस्य द्वयोर्बहूनां वा दक्षिणानि वामानि चाक्षीणि गृहीत्वा द्विधा चूर्णं कारयेत् । ततो दक्षिणं वामेन वामं दक्षिणेन समभ्यज्य रात्रौ तमसि च पश्यति ।

एकाम्लकं वराहाक्षि खद्योतः कालशारिवा ।
एतेनाभ्यक्तनयनो रात्रौ रूपाणि पश्यति ॥

त्रिरात्रोपोषितः पुष्ये शस्त्रहतस्य शूलप्रोतस्य वा पुंसः शिरःकपाले मृत्तिकायां यवानावास्याविक्षीरेण सेचयेत्; ततो यवविरूढमालामाबध्य नष्टच्छायारूपश्चरति ।

त्रिरात्रोपोषितः पुष्येण श्वमार्जारोलूकवागुलीनां दक्षिणानि वामानि चाक्षीणि द्विधा चूर्णं कारयेत् । ततो यथास्वमभ्यक्ताक्षो नष्टच्छायारूपश्चरति ।

त्रिरात्रोपोषितः पुष्येण पुरुषघातिनः काण्डकस्य शलाकाम्

भैषज्यं तावदाह — मार्जारेत्यादि । तत्र मार्जारः पृषदंशकः, वृकः ईहामृगः, श्वावित् शललः, वागुली पक्षिभेदः, नप्ता विष्किरः, उलूको दिवाभीतः । अन्येषां वाग्गुदादीनाम् । द्विधा पार्थक्येन । तत इत्यादि । दक्षिणम् अवामं स्वचक्षुः । वामेन मार्जारादिवामाक्षिचूर्णेन । समभ्यज्य सम्यगनुलिप्य ।

तमसि रूपदर्शनयोगस्य प्रकारान्तरमाह — एकाम्लकमित्यादि । तत्र अम्लकं लकुचम् । कालशारिवा कृष्णवर्णा भद्रा नामौषधिः ॥

अन्तर्धानयोगमाह — त्रिरात्रोपोषित इत्यादि । पुष्ये सिध्यनक्षत्रयुक्ते काले । आवास्य उप्त्वा । नष्टच्छायारूपः परैरदृष्टा छाया रूपं च यस्य स तथाभूतः ।

तस्यान्यं प्रकारमाह—त्रिरात्रोपोषितः पुष्येण श्वमार्जारेत्यादि । यथास्वं यथायथं दक्षिणचूर्णेन दक्षिणस्य स्वचक्षुषोऽभ्यञ्जनं वामचूर्णेन वामस्येति क्रमेणेत्यर्थः ।

तृतीयं प्रकारमाह — त्रिरात्रोपोषितः पुष्येण पुरुषघातिन इत्यादि । काण्डकस्य बाणस्य तल्लोहेनेत्यर्थः । शलाकाम् अञ्जनशलाकाम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अञ्जनीं च कारयेत्; ततोऽन्यतमेनाक्षिचूर्णेनाभ्यक्ताक्षो नष्टच्छाया-रूपश्चरति ।

त्रिरात्रोपोषितः पुष्येण कालायसीम् आञ्जनीं शलाकां च कारयेत्; ततो निशाचराणां सत्त्वानामन्यतमस्य शिरःकपालमञ्जनेन पूरयित्वा मृतायाः स्त्रिया योनौ प्रवेश्य दाहयेत्; तदञ्जनं पुष्येणोद्धृत्य तस्यामञ्जन्यां निदध्यात् । तेनाभ्यक्ताक्षो नष्टच्छायारूपश्चरति ।

यत्र ब्राह्मणमाहिताग्निं दग्धं दह्यमानं वा पश्येत्, तत्र त्रिरात्रोपोषितः पुष्येण स्वयंमृतस्य वाससा प्रसेवं कृत्वा चिताभस्मना पूरयित्वा तमावध्य नष्टच्छायारूपश्चरति ।

ब्राह्मणस्य प्रेतकार्ये या गौः मार्यते, तस्या अस्थिमज्जाचूर्ण-पूर्णाहिभस्त्रा पशूनामन्तर्धानम् ।

सर्पदष्टस्य भस्मना पूर्णा प्रचलाकभस्त्रा मृगाणामन्तर्धानम् ।

उलूकवागुलीपुच्छपुरीषजान्वस्थिचूर्णपूर्णाहिभस्त्रा पक्षिणाम-न्तर्धानम् ।

इत्यष्टावन्तर्धानयोगाः ।

अञ्जनीम् अञ्जनोत्पादपात्रीम् । अन्यतमेन अक्षिचूर्णेन श्वमार्जाराद्यन्यतम-चक्षुश्चूर्णेन ।

चतुर्थं प्रकारमाह—त्रिरात्रोपोषितः पुष्येण कालायसीमित्यादि । कालायसीं कालायसमयीम् । निशाचराणां श्वमार्जारादीनाम् । तस्यामञ्जन्यां कालायस्यां पूर्वोक्तायाम् ।

पञ्चमं प्रकारमाह—यत्र ब्राह्मणमित्यादि । प्रसेवं स्यूतं वस्त्रकोशमित्यर्थः । तम् आवध्य प्रसेवं स्वदेहसंबद्धं कृत्वा ।

लोमवल्लाङ्गूलानां चतुष्पदानामन्तर्धानयोगं षष्ठमाह—ब्राह्मण-स्येत्यादि । अस्थिमज्जाचूर्णपूर्णा अस्थ्नो मज्जायाश्च चूर्णेन पूर्णा । अहि-भस्त्रा सर्पचर्म ।

चतुष्पदसामान्यस्यान्तर्धानयोगं सप्तममाह—सर्पेत्यादि ।

पक्ष्यन्तर्धानयोगमष्टममाह—उलूकेत्यादि । उलूकवागुल्योर्यत् पु-च्छादिचतुष्टयं तस्य चूर्णैः पूर्णा ।

इत्यष्टावित्यादि ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

बलिं वैरोचनं वन्दे शतमायं च शम्बरम् ।
भण्डीरपाकं नरकं निकुम्भं कुम्भमेव च ॥
देवलं नारदं वन्दे वन्दे सावर्णिगालवम् ।
एतेषामनुयोगेन कृतं ते स्वापनं महत् ॥
यथा स्वपन्त्यजगराः स्वपन्त्यपि चमूखलाः ।
तथा स्वपन्तु पुरुषा ये च ग्रामे कुतूहलाः ॥
भण्डकानां सहस्रेण रथनेमिशतेन च ।
इमं गृहं प्रवेक्ष्यामि तूष्णीमासन्तु भाण्डकाः ॥
नमस्कृत्वा च मनवे बद्ध्वा शुनकफेलकाः ।
ये देवा देवलोकेषु मानुषेषु च ब्राह्मणाः ॥
अध्ययनपारगाः सिद्धाः ये च कैलासतापसाः ।
एते च सर्वसिद्धेभ्यः कृतं ते स्वापनं महत् ॥
अतिगच्छति च मय्यपगच्छन्तु संहताः ।
अलिते वलिते मनवे स्वाहा ॥

एतस्य प्रयोगः — त्रिरात्रोपोषितः कृष्णचतुर्दश्यां पुष्ययोगिन्यां श्वपाकीहस्ताद् बिलखावलेखनं क्रीणीयात् । तन्माषैः सह कण्डोलिकायां कृत्वा असङ्कीर्ण आदहने निखानयेत् । द्वितीयस्यां चतुर्दश्यामुद्धृत्य कुमार्या पेषयित्वा गुलिकाः कारयेत् । तत एकां गुलिकामभिमन्त्रयित्वा यत्रैतेन मन्त्रेण क्षिपति, तत् सर्वं प्रस्वापयति ।

अथ चतुरः प्रस्वापनयोगान् वक्ष्यति । तत्राद्ययोर्द्वयोः साधारणं मन्त्रमाह — बलिं वैरोचनमित्यादि । 'अलिते वलिते मनवे स्वाहा' इत्येतदन्तस्य मन्त्रस्यार्थः स्पष्टप्रायः सम्प्रदायतो निर्णेयः ॥

अस्य मन्त्रस्य प्रयोगमाह — एतस्येत्यादिना । श्वपाकीहस्तात् चण्डालीहस्तात् । बिलखावलेखनं बिलं खनन्तीति बिलखा आखुजातीया जन्तवश्चण्डालभक्ष्यभूताः तेषामवलेखनं खण्डम् । तद् -बिलखावलेखनम् । कण्डोलिकायां पिटे । असङ्कीर्णे अनाकीर्णे प्रदेशे । आदहने पितृवने । निखानयेत् खातायां भूमौ स्थापयेत् । द्वितीयस्यामित्यादि । कुमार्या कन्यकया । गुलिकाः गुटिकाः । तत् सर्वं तत्प्रदेशस्थं प्राणिजातम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

एतेनैव कल्पेन श्वाविधः शल्यकं त्रिकालं त्रिश्वेतमसङ्कीर्णं आदहने निखानयेत् । द्वितीयस्यां चतुर्दश्याम् उद्धृत्यादहनभस्मना सह यत्रैतेन मन्त्रेण क्षिपति, तत् सर्वं प्रस्वापयति ।

सुवर्णपुष्पीं ब्रह्माणीं ब्रह्माणं च कुशध्वजम् ।
सर्वाश्च देवता वन्दे वन्दे सर्वांश्च तापसान् ॥
वशं मे ब्राह्मणा यान्तु भूमिपालाश्च क्षत्रियाः ।
वशं वैश्याश्च शूद्राश्च वशतां यान्तु मे सदा ॥

स्वाहा । अमिले किमिले वयुजारे प्रयोगे फक्के वयुह्वे विहाले दन्तकटके स्वाहा ।

सुखं स्वपन्तु शुनका ये च ग्रामे कुतूहलाः ।
श्वाविधः शल्यकं चैतत् त्रिश्वेतं ब्रह्मनिर्मितम् ॥
प्रसुप्ताः सर्वसिद्धा हि एतत् ते स्वापनं कृतम् ।
यावद् ग्रामस्य सीमान्तः सूर्यस्योद्गमनादिति ॥

स्वाहा ।

एतस्य प्रयोगः — श्वाविधः शल्यकानि त्रिश्वेतानि । सप्तरात्रोपोषितः कृष्णचतुर्दश्यां खादिराभिः समिधाभिरग्निमेतेन मन्त्रेणा-

---

द्वितीयं प्रयोगमाह — एतेनैवेत्यादि । एतेनैव कल्पेन 'त्रिरात्रोपोषितः कृष्णचतुर्दश्यां पुष्ययोगिन्याम्' इत्यनेन विधिना । शल्यकं शलम् । त्रिकालं त्रिश्वेतं त्रिषु स्थानेषु कार्ष्ण्येन त्रिषु स्थानेषु श्वेतिम्ना च युक्तम् । क्षिपति अर्थाच्छल्यकम् ।

तृतीयस्य प्रस्वापनयोगस्य मन्त्रमाह — सुवर्णपुष्पीमित्यादि । 'सूर्यस्योद्गमनादिति स्वाहा' इत्यन्तं मन्त्रस्वरूपम् । तत्र 'वयुजारे' इत्यस्य स्थाने 'वयुचारे' इति क्वचित् पठ्यते, 'वयुह्वे' इत्यस्य स्थाने 'घुह्वे' इति, 'कटके' इत्यस्य स्थाने 'कट्टके' इति च ।

अस्य मन्त्रस्य प्रयोगमाह — एतस्य प्रयोगः श्वाविधः इत्यादिना । 'त्रिश्वेतानी'त्येतदुत्तरम् 'आदहने निखानयेदि'ति संबन्धनीयम् । खादिराभिः खदिरो दन्तधावनाख्यो वृक्षः तन्मयीभिः । इह अणन्तत्वेऽपि ङीबभाव आर्षः । समिधाभिः समिद्भिः; इह 'आपं चैव हलन्तानाम्' इति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ष्टशतसंपातं कृत्वा मधुघृताभ्याम् अभिजुहुयात् । तत एकमेतेन मन्त्रेण ग्रामद्वारि गृहद्वारि वा यत्र निखन्यते, तत् सर्वं प्रस्वापयति ।

बलिं वैरोचनं वन्दे शतमायं च शम्बरम् ।
निकुम्भं नरकं कुम्भं तन्तुकच्छं महासुरम् ॥
अर्मालवं प्रमीलं च मण्डोलूकं घटोबलम् ।
कृष्णकंसोपचारं च पौलोमीं च यशस्विनीम् ॥
अभिमन्त्रयित्वा गृह्णामि सिद्धार्थं शवशारिकाम् ।
जयतु जयति च नमः शलकभूतेभ्यः स्वाहा ।
सुखं स्वपन्तु शुनका ये च ग्रामे कुतूहलाः ॥
सुखं स्वपन्तु सिद्धार्था यमर्थं मार्गयामहे ।
यावदस्तमयादुदयो यावदर्थं फलं मम ॥

इति स्वाहा ।

एतस्य प्रयोगः— चतुर्भक्तोपवासी कृष्णचतुर्दश्यामसङ्कीर्णे आदहने बलिं कृत्वा एतेन मन्त्रेण शवशारिकां गृहीत्वा पोत्रीपोट्टलिकां बध्नीयात् । तन्मध्ये श्वाविधः शल्यकेन विद्ध्वा यत्रैतेन मन्त्रेण निख-न्यते, तत् सर्वं प्रस्वापयति ।

उपैमि शरणं चाग्निं दैवतानि दिशो दश ।
अपयान्तु च सर्वाणि वशतां यान्तु मे सदा ॥

स्वाहा ।

वागुरिमतेन हलन्ताट्टाप् । अष्टशतसम्पातं कृत्वा अष्टोत्तरं शतं संपाताः होमा यस्मिंस्तं तथाभूतं कृत्वा । तत इत्यादि । ततः आदहननिखातोद्धृतेभ्यः शल्यकेभ्यः ।

चतुर्थस्य प्रस्वापनयोगस्य मन्त्रमाह — बलिं वैरोचनमित्यादिना 'फलं मम । इति स्वाहा' इत्यन्तेन ।

एतस्य प्रयोगमाह —एतस्येत्यादि । चतुर्भक्तोपवासी चतुर्दिवसान्नानशनव्रती । शवशारिकां शवभूतां शारिकां मुखरां नाम पक्षिभेदम् । पोत्रीपोट्टलिकां पोत्रं वस्त्रं तद्रूपं पोत्री पोट्टलिका 'पोट्टलम्' इति भाषाप्रसिद्धः पदार्थः पोत्रीमयीं पोट्टलिकामित्यर्थः । तन्मध्य इत्यादि । तन्मध्ये तस्याः पोट्टलिकाया मध्ये ।

अथ द्वारापावरणयोगस्य मन्त्रमाह —उपैमि शरणमित्यादि ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

एतस्य प्रयोगः — त्रिरात्रोपोषितः पुष्येण शर्करा एकविंशतिसंपातं कृत्वा मधुघृताभ्याम् अभिजुहुयात् । ततो गन्धमाल्येन पूजयित्वा निखानयेत् । द्वितीयेन पुष्येणोद्धृत्यैकां शर्करामभिमन्त्रयित्वा कवाटमाहन्यात् । अभ्यन्तरं चतसृणां शर्कराणां द्वारमपाक्रियते ।

चतुर्भक्तोपवासी कृष्णचतुर्दश्यां भग्नस्य पुरुषस्यास्थ्ना ऋषभं कारयेत्; अभिमन्त्रयेच्चैतेन, द्विगोयुक्तं गोयानमाहृतं भवति ; ततः परमाकाशे विक्रामति ।

सदा रविरविः सगण्डपरिघाति सर्वं भणाति । चण्डालीकुम्भीतम्बकटुकसारीघः सनारीभगोऽसि स्वाहा ।

तालोद्घाटनं प्रस्वापनं च ।

त्रिरात्रोपोषितः पुष्येण शस्त्रहतस्य शूलप्रोतस्य वा पुंसः शिरःकपाले मृत्तिकायां तुवरीरावास्योदकेन सेचयेत् । जातानां पुष्येणैव गृहीत्वा रज्जुकां वर्तयेत् । ततः सज्यानां धनुषां यन्त्राणां च पुरस्ताच्छेदनं ज्याच्छेदनं करोति ।

तत्प्रयोगमाह — **एतस्य प्रयोगः — त्रिरात्रोपोषित इत्यादि** । शर्कराः शिरोस्थीनि शिलाविशेषान् वा, गृहीत्वेति शेषः । अभिजुहुयाद् अर्थादग्निम् । पूजयित्वा शर्करा एवाभ्यर्च्य । **अभ्यन्तरमित्यादि** । एकया शर्करया कवाटाघाते कृते शर्कराचतुष्टयान्तरालपरिमाणं विवरं कवाटे जायत इत्यर्थः ।

उक्तस्यैव मन्त्रस्य प्रयोगान्तरमाह — **चतुरित्यादि** । एतेन 'उपैमि शरणमि'त्यादिना 'स्वाहा'न्तेन मन्त्रेण । आहृतगोयानप्रयोजनमाह — **ततः परमाकाश इत्यादि** ।

तालोद्घाटनप्रस्वापनयोरुभयोः साधकं योगं वक्ष्यन् प्रथमं तस्य मन्त्रमाह — **सदारविरविः सगण्डपरिघातीत्यादि** । सगण्डस्थाने सगन्धेति, क्वचित् पाठः । तम्बस्थाने तुम्भेति, 'सारीघः सनारी' इत्यस्य स्थाने 'सारीपसारी' इति च ।

तालोद्घाटनमिति । तालस्य द्वारयन्त्रस्य उद्घाटनम् ।

अथ ज्याच्छेदनयोगमाह — **त्रिरात्रोपोषित इत्यादि** । **तुवरीः** आढकीः । आवास्य उप्त्वा । रज्जुकाम् अल्पां रज्जुम् । वर्तयेत् सृजेत् । अर्थात् तुवर्यङ्कुरैरेव । वर्तयतीत्यपि पाठः । **तत इत्यादि** । सज्यानां समा-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

उदकाहिभस्त्रामुच्छ्वासमृत्तिकया स्त्रियाः पुरुषस्य वा पूरयेत्; नासिकाबन्धनं मुखग्रहश्च ।

वराहवस्तिमुच्छ्वासमृत्तिकया पूरयित्वा मर्कटस्नायुनावबध्नीयाद्; आनाहकारणम् ।

कृष्णचतुर्दश्यां शस्त्रहताया गोः कपिलायाः पित्तेन राजवृक्षमयीममित्रप्रतिमाम् अञ्ज्यात्; अन्धीकरणम् ।

चतुर्भक्तोपवासी कृष्णचतुर्दश्यां बलिं कृत्वा शूलप्रोतस्य पुरुषस्यास्थ्ना कीलकान् कारयेत् । एतेषामेकः पुरीषे मूत्रे वा निखात आनाहं करोति; पादेऽस्यासने वा निखातः शोषेण मारयति; आपणे क्षेत्रे गृहे वा वृत्तिच्छेदं करोति ।

एतेन कल्पेन विद्युद्दग्धस्य वृक्षस्य कीलका व्याख्याताः ।

रोपितमौर्वीकाणाम् । ज्याछेदनमिति । एतद् यन्त्रावयवच्छेदनस्याप्युपलक्षणम् ।

नासिकाबन्धनमुखग्रहयोः साधकं योगमाह — **उदकाहिभस्त्रामि**त्यादि । उच्छ्वासमृत्तिकया उच्छ्वाससम्बद्धया मृत्तिकया । नासिकाबन्धनं नासानिरोधः । मुखग्रहः मुखस्तम्भनम् ।

आनाहयोगमाह—**वराहवस्ति**मित्यादि । उच्छ्वासमृत्तिकया अर्थात् स्त्रियाः पुरुषस्य वा । मर्कटस्नायुना वानरवस्नसया 'स्नाय्वना स्नसा' इति यादवः । आनाहकारणम् आनाहो मलविष्टम्भः तस्य कारणम् ।

शत्र्वन्धीकरणयोगमाह—**कृष्णचतुर्दश्या**मित्यादि । पित्तेन पित्तधातुना । अञ्ज्यात् चक्षुषोर्लिम्पेत् । अन्धीकरणम् अर्थादमित्रस्य ।

आनाहयोगान्तरं, शोषेण मारणयोगं, वृत्तिच्छेदकरणयोगं चाह — **चतुर्भक्ते**त्यादि । बलिं कृत्वा यथाविहितं भूतोपहारं दत्वा । **आनाहं करोतीति** । यदीयं मूत्रादि तस्येत्यार्थम् । **पादेऽस्ये**त्यादि । अस्य आसनादिस्वामिनः । वृत्तिच्छेदं जीविकाभङ्गम् ।

शूलप्रोतपुरुषास्थिकीलकोक्तं विधिं विद्युद्दग्धवृक्षकीलकेष्वतिदिशति— **एतेन कल्पेने**त्यादि । विद्युद्दग्धवृक्षकीलकानामप्येकः पुरीषादिनिखातस्तत्तत्कार्यं जनयतीत्यर्थः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पुनर्नवमवाचीनं निम्बः काकमधुश्च यः ।
कपिरोम मनुष्यास्थि बद्ध्वा मृतकवाससा ॥
निखन्यते गृहे यस्य पिष्ट्वा वा यं प्रपाययेत् ।
सपुत्रदारः सधनस्त्रीन् पक्षान् नातिवर्तते ॥
पुनर्नवमवाचीनं निम्बः काकमधुश्च यः ।
स्वयंगुप्ता मनुष्यास्थि पदे यस्य निखन्यते ॥
द्वारे गृहस्य सेनाया ग्रामस्य नगरस्य वा ।
सपुत्रदारः सधनस्त्रीन् पक्षान् नातिवर्तते ॥
अजमर्कटरोमाणि मार्जारनकुलस्य च ।
ब्राह्मणानां श्वपाकानां काकोलूकस्य चाहरेत् ॥
एतेन विष्ठावक्षुण्णा सद्य उत्सादकारिका ।
प्रेतनिर्मालिका किण्वं रोमाणि नकुलस्य च ॥
वृश्चिकाल्यहिकृत्तिश्च पदे यस्य निखन्यते ।
भवत्यपुरुषः सद्यो यावत् तन्नापनीयते ॥

त्रिरात्रोपोषितः पुष्येण शस्त्रहतस्य शूलप्रोतस्य वा पुंसः शिरः-कपाले मृत्तिकायां गुञ्जा आवास्योदकेन च सेचयेत् । जातानाममावास्यायां पौर्णमास्यां वा पुष्ययोगिन्यां गुञ्जावल्लीर्ग्राहयित्वा मण्डलिकानि कारयेत् । तेष्वन्नपानभाजनानि न्यस्तानि न क्षीयन्ते ।

योगान्तरं श्लोकद्वयेनाह—पुनर्नवमित्यादि । अवाचीनं पुनर्नवम् अवाग्भवं शोथघ्नीसंज्ञं शाकं तत्पुष्पं वा । काकमधुः काकप्रियफलो वृक्षः । काममधुरिति पाठान्तरं 'प्रपाययेद्' इत्यस्य स्थाने 'पदं नयेद्' इति क्वचित् पठ्यते ॥

त्रिपक्षान्तरमारणयोगस्य प्रकारान्तरं श्लोकद्वयेनाह — पुनर्नवमित्यादि । स्वयंगुप्ता आत्मगुप्तापरपर्याया कच्छुरा नामौषधिः ॥

सद्य उत्सादकारकं योगं सार्धेनाह — अजमर्कटेत्यादि । एतेन अजमर्कटादिरोमसंघातेन सह । अवक्षुण्णा चूर्णिता । सद्य उत्सादकारिका तत्क्षणोत्सत्तिहेतुः, अर्थाद् विष्ठिनः ॥

अपुरुषीकरणयोगं सार्धेनाह — प्रेतेत्यादि । प्रेतनिर्मालिका शवनिर्माल्यम् । किण्वं मद्यबीजम् । वृश्चिकाल्यहिकृत्तिः वृश्चिकाही प्रसिद्धौ अली पुच्छकण्टकवान् वृश्चिकभेदः तेषां कृत्तिः चर्म ॥

अन्नपानभाजनाक्षययोगमाह—त्रिरात्रोपोषित इत्यादि । गुञ्जावल्ली .

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रात्रिप्रेक्षायां प्रवृत्तायां प्रदीपाग्निषु मृतधेनोः स्तनानुत्कृत्य दाहयेत्। दग्धान् वृषमूत्रेण पेषयित्वा नवकुम्भमन्तर्लेपयेत्; तं ग्राममपसव्यं परिणीय तत्र न्यस्तं नवनीतमेषां तत् सर्वमागच्छतीति।

कृष्णचतुर्दश्यां पुष्ययोगिन्यां शुनो लग्नकस्य योनौ कालायसीं मुद्रिकां प्रेषयेत्; तां स्वयं पतितां गृह्णीयात्; तया वृक्षफलान्याकारितान्यागच्छन्ति।

मन्त्रभैषज्यसंयुक्ता योगा मायाकृताश्च ये।
उपहन्यादमित्रांस्तैः स्वजनं चाभिपालयेत्॥

इति कौटलीयार्थशास्त्रे औपनिषदिके चतुर्दशाधिकरणे
तृतीयोऽध्यायः प्रलम्भने भैषज्यमन्त्रप्रयोगः,
आदितोऽष्टचत्वारिंशच्छततमः॥

पुंशिरःकपालोत्पन्ना एव कृष्णलालताः। मण्डलिकानि मण्डलाकृतीन्यधिकरणानि।

ग्रामगतसर्वनवनीतागमनयोगमाह — रात्रीत्यादि। रात्रिप्रेक्षायां रात्रिनृत्तादौ। परिणीय परिगमय्य। एषां ग्रामाणाम्।

वृक्षफलानयनयोगमाह — कृष्णेत्यादि। लग्नकस्य मत्तस्य। शुनः इह पुंस्त्वमविवक्षितं शुन्या इत्यर्थः। मुद्रिकाम् अङ्गुलीयकादिम्। तया मुद्रिकया। आकारितानि आहूतानि॥

प्रान्ते श्लोकमाह — मन्त्रेत्यादि। मन्त्रभैषज्यसंयुक्ताः प्रकृताध्यायोक्ताः ये योगाः, ये च मायाकृताः गात्रप्रज्वालनाङ्गारराशिसञ्चारादिसाधकाः योगाः, तैः, अमित्रान् अरातीन्, उपहन्यात्, स्वजनं च अभिपालयेद् अमित्रोपघातद्वारेण रक्षेद्, विजिगीषुः।

दत्ता टिप्पणिकास्माभिर्भैषज्यस्यैवमल्पशः।
क्रमस्तु सर्वस्तस्यापि मन्त्रवत् साम्प्रदायिकः॥

इति कौटलीयार्थशास्त्रव्याख्यायाम् औपनिषदिके चतुर्दशेऽधिकरणे तृतीयोऽध्यायः प्रलम्भने भैषज्यमन्त्रप्रयोगः। प्रलम्भनं समाप्तम्।
आदितोऽष्टाचत्वारिंशच्छततमः॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

१७९. प्रक· स्वबलोपघातप्रतीकारः ।

स्वपक्षे परप्रयुक्तानां दूषिविषगराणां प्रतीकारे श्लेष्मातककपित्थदन्तिदन्तशठगोजीशिरीषपाटलीबलास्योनाकपुनर्नवाश्वेतावरणक्काथयुक्तं चन्दनसालावृकीलोहितयुक्तं तेजनोदकं राजोपभोग्यानां गुह्यप्रक्षालनं स्त्रीणां सेनायाश्च विषप्रतीकारः ।

पृषतनकुलनीलकण्ठगोधापित्तयुक्तं मषीराजिचूर्णं सिन्दुवारितवरणवारुणीतण्डुलीयकशतपर्वाग्रपिण्डीतकयोगो मदनदोषहरः ।

सृगालविन्नामदनसिन्दुवारितवरणवारणवल्लीमूलकषायाणामन्यतमस्य समस्तानां वा क्षीरयुक्तं पानं मदनदोषहरम् ।

स्वबलोपघातप्रतीकार इति सूत्रम् । स्वसैन्यस्य परप्रयुक्तविषाम्बुदूषणादिनिमित्तो य उपघातः तस्य प्रतीकारोऽभिधीयत इति सूत्रार्थः ।

स्वपक्ष इत्यादि । प्रतीकारे आकाङ्क्षमाण इति शेषः । श्लेष्मातकेत्यादि । राजभोग्यानां स्त्रीणां सेनायाश्च विषप्रयोगे परेण कृते श्लेष्मातकादिद्वादशकक्वाथयुक्तेन चन्दनजम्बुकीरुधिरयुक्तेन च तेजनोदकेन तद्गुह्यावनेजनं प्रतीकार इत्यर्थः । तत्र श्लेष्मातकः शेलुर्बसन्तकुसुमाख्यः, कपित्थो दधित्थः, दन्ती उदुम्बरपर्णी, दन्तशठो जम्बीरः, गोजी गोजिह्वा दार्विकाख्या, शिरीषः कपीतनः शुकप्रियाख्यः, पाटली गोलिहः अमोघा वा, बला वाट्यालकः, स्योनाकः शुकनासाख्यः, पुनर्नवा शोथघ्नी, श्वेता पैष्टिकी सुरा, वरणः सेतुसंज्ञो वृक्षभेदः ।

मदनदोषप्रतीकारमाह — पृषतेत्यादि । पृषतादिचतुष्टयपित्तयुक्तं मषीराज्योश्चूर्णं सिन्दुवारितादिषट्कयोग इति द्वयं मदकरद्रव्यदोषहरमित्यर्थः । तत्र पृषतो बिन्दुचित्रो मृगभेदः, नकुलो बभ्रुः, नीलकण्ठो मयूरः, गोधा जलजन्तुभेदः । मषी नीलशेफालिका, राजिः राजसर्षपः । सिन्दुवारितः सिन्दुवारवृक्षः; वरणः सेतुरुद्भिद्भेदः, वारुणी दूर्वा, तण्डुलीयकः जीवशाकः, शतपर्वाग्रं वंशाग्रं, पिण्डीतकः मरुवकः ।

उक्तस्यैव प्रतीकारस्य प्रकारान्तरमाह — सृगालेत्यादि । सृगालविन्नादिपञ्चकमूलकषायाणां व्यस्तानां समस्तानां वा क्षीरयुक्तं पानं मदं हरतीत्यर्थः । तत्र सृगालविन्ना ओषधिभेदः, मदनः प्रसिद्धः, वारणवल्ली गजाह्वा गजापिप्पली ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कैडर्यपूतितिलतैलमुन्मादहरं नस्तःकर्म ।

प्रियङ्गुनक्तमालयोगः कुष्ठहरः ।

कुष्ठलोध्रयोगः पाकशोषघ्नः ।

कट्फलद्रवन्तीविलङ्गचूर्णं नस्तःकर्म शिरोरोगहरम् ।

प्रियङ्गुमञ्जिष्ठातगरलाक्षारसमधुकहरिद्राक्षौद्रयोगो रज्जूदकविषप्रहारपतननिस्संज्ञानां पुनःप्रत्यानयनाय ।

मनुष्याणामक्षमात्रं; गवाश्वानां द्विगुणं; चतुर्गुणं हस्त्युष्ट्राणाम् ।

रुक्मगर्भश्चैषां मणिः सर्वविषहरः ।

उन्मादप्रतीकारमाह — **कैडर्यपूतितिलतैलमित्यादि** । कैडर्यः कट्फलः, पूतिः पूतिकरजः, तिलाः प्रसिद्धाः । एतत्तैलेन क्रियमाणं नस्तःकर्म चित्तविभ्रमहरं भवतीत्यर्थः ।

कुष्ठहरं योगमाह — **प्रियङ्गुनक्तमालयोग** इत्यादि । तत्र प्रियङ्गुः कङ्गुः, नक्तमालश्चिरिबिल्वः ।

कुष्ठलोध्रयोग इति । कोठशाबरयोगः, पाकशोषघ्नः पाकः केशशौक्ल्यं शोषः क्षयः, तावुभौ हन्ति ।

शिरोरोगहरं नस्तःकर्मविशेषमाह — **कट्फलेत्यादि** । तत्र कट्फलः कैडर्यः, द्रवन्ती शम्बरी नामौषधिभेदः, विलङ्गः क्रिमिघ्नः ।

नष्टसंज्ञाप्रत्यापत्तिसाधकं योगमाह — **प्रियङ्ग्वित्यादि** । प्रियङ्गुः कङ्गुः, मञ्जिष्ठा अञ्जनवल्लिका, तगरो नन्द्यावर्तः, लाक्षा अलक्तः, मधुको मधुष्ठीलः, हरिद्रा रात्र्याख्या, क्षौद्रं माक्षिकम् एषां योगः योगसिद्धमौषधमित्यर्थः । रज्जूदकविषप्रहारपतननिस्संज्ञानां रज्जुबन्धेन उदकमज्जनेन विषवेगेन ताडनेन उच्चदेशादधःपतनेन च नष्टसंज्ञानां प्राणिनां, पुनःप्रत्यानयनाय पुनस्संज्ञाप्रतिलम्भनाय, कल्पत इति शेषः ।

उक्तानां प्रतीकारौषधानामुपयोक्तव्यां मात्रामाह — **मनुष्याणामि**त्यादि । अक्षमात्रम् अक्षः षोडशमाषकाः तावन्मात्रमित्यर्थः ।

रुक्मेत्यादि । रुक्मगर्भः अन्तर्गतस्वर्णः । एषां मणिः उक्तप्रियङ्ग्वादिनिष्पन्ना गुलिकेत्यर्थः । सर्वविषहरः धार्यमाणः सर्वविधं विषं हरति ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

जीवन्तीश्वेतामुष्ककपुष्पवन्दाकानामक्षीवे जातस्य अश्वत्थस्य मणिः सर्वविषहरः ।

तूर्याणां तैः प्रलिप्तानां शब्दो विषविनाशनः ।
लिप्तध्वजं पताकां वा दृष्ट्वा भवति निर्विषः ॥
एतैः कृत्वा प्रतीकारं स्वसैन्यानामथात्मनः ।
अमित्रेषु प्रयुञ्जीत विषधूमाम्बुदूषणान् ॥

इति कौटलीयार्थशास्त्रे औपनिषदिके चतुर्दशाधिकरणे
चतुर्थोऽध्यायः स्वबलोपघातप्रतीकारः,
आदित एकोनपञ्चाशच्छततमः ॥
एतावता कौटलीयस्यार्थशास्त्रस्यौपनिषदिकं
चतुर्दशमधिकरणं समाप्तम् ॥

जीवन्तीत्यादि । जीवन्त्यादीनां मणिः अक्षीवे जातस्याश्वत्थस्य मणिश्च सर्वविषहर इत्यर्थः । तत्र जीवन्ती गुळूची, श्वेता शङ्खिनी, मुष्ककः मोक्षकवृक्षः, पुष्पम् ओषधिभेदः, वन्दाका लताभेदः । अक्षीवः शिग्रुः महानिम्बो वा ॥

अध्यायप्रान्ते श्लोकावाह—तूर्याणामित्यादि । तूर्याणां वाद्यानाम् । तैः जीवन्त्यादिसाधितैरौषधैः । ध्वजं केतुदण्डम् । पताकां दण्डोर्ध्वबद्धमंशुकम् । एतैरिति । औषधयोगैरुक्तैः, स्वसैन्यानाम् आत्मनश्च प्रतीकारं रक्षां, कृत्वा, विषधूमाम्बुदूषणान् विषधूमयोगान् उदकदूषणयोगांश्च, अमित्रेषु शत्रुषु, प्रयुञ्जीत ॥

चतुर्दशाधिकरणमित्यौपनिषदाह्वयम् ।
व्याख्यायामर्थशास्त्रस्य श्रीमूले समपूर्यत ॥

इति श्रीवञ्चिमण्डलमहाराजाश्रितस्य ताम्रपर्णीतीरवर्तितरुवाग्रहाराभिजनस्य श्रीसीताम्बाश्रीरामसुब्रह्मण्यार्यसूनोर्महामहोपाध्यायगणपतिशास्त्रिणः कृतिषु कौटलीयार्थशास्त्रव्याख्यायां श्रीमूलाख्यायाम् औपनिषदिके चतुर्दशेऽधिकरणे चतुर्थोऽध्यायः स्वबलोपघातप्रतीकारः । आदित एकोनपञ्चाशच्छततमः ।
औपनिषदिकं चतुर्दशमधिकरणं समाप्तम् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तन्त्रयुक्तिः—पञ्चदशमधिकरणम् ।

१८०. प्रक. तन्त्रयुक्तयः ।

मनुष्याणां वृत्तिरर्थः, मनुष्यवती भूमिरित्यर्थः; तस्याः पृथिव्या लाभपालनोपायः शास्त्रमर्थशास्त्रमिति ।

तद् द्वात्रिंशद्युक्तियुक्तम्—अधिकरणं, विधानं, योगः, पदार्थः, हेत्वर्थः, उद्देशः, निर्देशः, उपदेशः, अपदेशः, अतिदेशः, प्रदेशः, उपमानं, अर्थापत्तिः, संशयः, प्रसङ्गः, विपर्ययः, वाक्यशेषः, अनुमतं, व्याख्यानं, निर्वचनं, निदर्शनं, अपवर्गः, स्वसंज्ञा, पूर्वपक्षः, उत्तरपक्षः, एकान्तः, अनागतावेक्षणम्, अतिक्रान्तावेक्षणं, नियोगः, विकल्पः, समुच्चयः, ऊह्यमिति ।

यमर्थमधिकृत्योच्यते तदधिकरणम्—"पृथिव्या लाभे पालने च यावन्त्यर्थशास्त्राणि पूर्वाचार्यैः प्रस्थापितानि प्रायशस्तानि संहृत्यैकमिदमर्थशास्त्रं कृतम्" (अधि० १. अध्या० १) इति ।

तदित्थं चतुर्दशभिरधिकरणैः पृथिवीलाभपालनानुबन्धि कृत्स्नमर्थशास्त्रीयं प्रमेयजातं सप्रपञ्चं निरूप्य प्रकृतशास्त्रेऽर्थनिर्णयोपयोगितयाश्रिताः युक्तीः सलक्षणोदाहरणं दर्शयितुं तन्त्रयुक्तिसंज्ञमन्तिमं पञ्चदशमधिकरणमिदमारभ्यते । अत्र चैकमेव सूत्रं—

तन्त्रयुक्तय इति । तन्त्रम् अर्थशास्त्रं, तदाश्रिता युक्तयोऽभिधीयन्त इति सूत्रार्थः ।

तत्र प्रथममर्थशास्त्रपदार्थमाह—मनुष्याणामित्यादि । एतच्च 'पृथिव्या लाभे पालने च' इत्यादेः शास्त्रादिमवाक्यस्य व्याख्यया कृतपूर्वया व्याख्यातप्रायम् ।

तदित्यादि । तद् अर्थशास्त्रम् । अधिकरणमित्यादिना तासां द्वात्रिंशतो युक्तीनां नामत उद्देशः ।

अधिकरणं विवृणोति—यमित्यादि । यं प्रधानभूतमर्थमधिकृत्यार्थजातमुच्यते, तत् प्रधानार्थसंबद्धं सर्वमर्थजातम् अधिकरणमित्युच्यत इत्यर्थः । तदुदाहरति—पृथिव्या इत्यादि । पृथिवीरूपप्रधानार्थसंबद्धनानार्थप्रतिपादकं सर्वं शास्त्रमधिकरणपदव्यपदेश्यमित्यभिप्रायः । अनेन न्यायेन विनयाधिकाराध्यक्षप्रचारादिष्ववान्तरार्थेषु प्रधानतया विवक्षितेषु तत्तत्संबद्धान्यर्थजातानि तत्तदधिकरणानि भवन्ति ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शास्त्रस्य प्रकरणानुपूर्वी विधानम् — "विद्यासमुद्देशः, वृद्ध-संयोगः, इन्द्रियजयः, अमात्योत्पत्तिः" (अधि० १. अध्या० १) इत्येवमादिकमिति ।

वाक्ययोजना योगः — "चतुर्वर्णाश्रमो लोकः" (अधि० १. अध्या० ४) इति ।

पदावधिकः पदार्थः — "मूलहरः" इति पदम् । "यः पितृ-पैतामहमर्थमन्यायेन भक्षयति स मूलहरः" (अधि० २. अध्या० ९) इत्यर्थः ।

हेतुरर्थसाधको हेत्वर्थः—"अर्थमूलौ हि धर्मकामौ" (अधि० १. अध्या० ७) इति ।

समासवाक्यमुद्देशः — "विद्याविनयहेतुरिन्द्रियजयः" (अधि० १. अध्या० ६) इति ।

व्यासवाक्यं निर्देशः — "कर्णत्वगक्षिजिह्वाघ्राणेन्द्रियाणां श-ब्दस्पर्शरूपरसगन्धेष्वविप्रतिपत्तिरिन्द्रियजयः" (अधि० १. अध्या० ६) इति ।

विधानमाह — शास्त्रस्येत्यादि । प्रकरणानुपूर्वी प्रकरणानां प्रत्यधि-करणं क्रमनिवेशनम् । एवमादिकमित्यादिपदेन 'मन्त्रिपुरोहितोत्पत्तिरि'त्या-दिकं 'तन्त्रयुक्तयः' इत्येतदन्तं प्रथमाध्यायगतं गृह्यते ।

योगमाह — वाक्ययोजनेति । वाक्यस्य योजना पदानां क्रियाका-रकभावेन तद्विशेषणभावेन च मिथो योजनेत्यर्थः । 'चतुर्वर्णाश्रम' इति योग-स्योदाहरणम् । विनयाधिकारचतुर्थाध्यायशेषश्चायं श्लोकः ।

पदार्थमाह — पदावधिक इत्यादि । यस्यार्थस्य पदमवधिः स प-दार्थः । पदावधिकस्य शब्दभागस्य कल्प्यमानोऽर्थः पदार्थ इत्यर्थः ।

हेत्वर्थाख्यां तन्त्रयुक्तिमाह — हेतुरित्यादि । 'अर्थ एव प्रधान इति कौटल्यः' इति प्रतिज्ञातस्यार्थप्राधान्यलक्षणस्यार्थस्य धर्मकामयोरर्थसाध्यत्वं हेतुर्भवतीति स हेत्वर्थः ।

उद्देशमाह — समासेत्यादि । समासवाक्यं संक्षेपवाक्यम् । तत्त्वं च इन्द्रियशब्देन कर्णादीनां ग्रहणाद् बोद्धव्यम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

एवं वर्तितव्यमित्युपदेशः—"धर्मार्थाविरोधेन कामं सेवेत न निस्सुखः स्यात्" (अधि० १. अध्या० ७) इति ।

एवमसावाहेत्यपदेशः — "मन्त्रिपरिषदं द्वादशामात्यान् कुर्वीतेति मानवाः; षोडशेति बार्हस्पत्याः; विंशतिमित्यौशनसाः; यथासामर्थ्यमिति कौटल्यः" (अधि० १. अध्या० १५) ।

उक्तेन साधनमतिदेशः — "दत्तस्याप्रदानमृणादानेन व्याख्यातम्" (अधि० ३. अध्या० १६) इति ।

वक्तव्येन साधनं प्रदेशः — "सामदानभेददण्डैर्वा यथापत्सु व्याख्यास्यामः" (अधि० ७. अध्या० १४) इति ।

दृष्टेनादृष्टस्य साधनमुपमानम् — "निवृत्तपरिहारान् पितेवानुगृह्णीयात्" (अधि० २. अध्या० १) इति ।

यदनुक्तमर्थादापद्यते सार्थापत्तिः — "लोकयात्राविद् राजानमात्मद्रव्यप्रकृतिसम्पन्नं प्रियहितद्वारेणाश्रयेत" (अधि० ५. अध्या० ४) नाप्रियहितद्वारेणाश्रयेतेत्यर्थादापन्नं भवतीति ।

उभयतोहेतुमानर्थः संशयः — "क्षीणलुब्धप्रकृतिमपचरितप्रकृतिं वा" (अधि० ७. अध्या० ५) इति ।

निर्देशमाह—व्यासवाक्यमित्यादि । अत्र इन्द्रियाणां कर्णत्वगादिविशेषाकारैर्ग्रहणाद् व्यासवाक्यता ।

उपदेशमाह — एवं वर्तितव्यमित्यादि ।

'एवमसावाहे'त्येवमन्यदीयपक्षस्य खण्डनार्थमुपन्यासः अपदेशाख्या तन्त्रयुक्तिरित्याह — एवमसावित्यादि ।

अतिदेशमाह — उक्तेन साधनमित्यादि ।

उपरिष्टाद् वक्ष्यमाणेनार्थेन समर्थनं प्रदेश इत्याह — वक्तव्येन साधनमित्यादि ।

उपमानमाह— दृष्टेनेत्यादि । पिता हि प्रसिद्धः पुत्रेषु वत्सलो योगक्षेमचिन्तकश्च लोके दृष्टः; तदुपमया राज्ञः प्रजासु वात्सल्यादिकमवचनेऽपि सिद्धं भवतीति दृष्टेनादृष्टसाधनमिह द्रष्टव्यम् ।

अर्थापत्तिमाह — यदनुक्तमित्यादि ।

संशयमाह — उभयतोहेतुमानित्यादि । 'क्षीणलुब्धे'त्यादिना

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रकरणान्तरेण समानोऽर्थः प्रसङ्गः — "कृषिकर्मप्रदिष्टायां भूमाविति समानं पूर्वेण" (अधि० १. अध्या० ११) इति ।

प्रतिलोमेन साधनं विपर्ययः—"विपरीतमतुष्टस्य" (अधि० १. अध्या० १६) इति ।

येन वाक्यं समाप्यते, स वाक्यशेषः — "छिन्नपक्षस्येव राज्ञश्चेष्टानाशश्चेति" (अधि० ८. अध्या० १) तत्र शकुनेरिति वाक्यशेषः ।

परवाक्यमप्रतिषिद्धमनुमतम् — "पक्षावुरस्यं प्रतिग्रह इत्यौशनसो व्यूहविभागः" (अधि० १०. अध्या० ६) इति ।

अतिशयवर्णना व्याख्यानम् — "विशेषतश्च सङ्घानां सङ्घधर्मिणां च राजकुलानां द्यूतनिमित्तो भेदः तन्निमित्तो विनाश इत्यसत्प्रग्रहः पापिष्ठतमो व्यसनानां तन्त्रदौर्बल्यात्" (अधि० ८. अध्या० ३) इति ।

गुणतः शब्दनिष्पत्तिर्निर्वचनम् — "व्यस्यत्येनं श्रेयस इति व्यसनम्" (अधि० ८. अध्या० १) इति ।

निदर्शिते संशये उभयतोहेतुमत्त्वं तद्वाक्यव्याख्यायां षाड्गुण्यपञ्चमाध्याये स्पष्टम् ।

प्रसङ्गमाह — प्रकरणान्तरेणेत्यादि । एकदेशातिदेशोऽयम् ।

विपर्ययमाह — प्रतिलोमेनेत्यादि । प्रतिलोमेन उक्तविपरीतेन ।

वाक्यशेषमाह — येनेत्यादि । वाक्यशेषः वाक्यघटकं पदम् अनुपात्तमपि सामर्थ्यतो गम्यत इत्यर्थः । इह चकारोऽप्युदाहरणे पठ्यते ।

अनुमतमाह — परेत्यादि । उदाहरणस्य व्याख्यानं दशमाधिकरणषष्ठाध्याये द्रष्टव्यम् ।

साधितस्यार्थस्यातिशयेन युक्त्यन्तरैः समर्थनं व्याख्यानमित्याह — अतिशयेत्यादि ।

अर्थान्वयेन शब्दस्य प्रवृत्तिर्निर्वचनमित्यभिप्रायेणाह — गुणत इत्यादि ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दृष्टान्तो दृष्टान्तयुक्तो निदर्शनम् — "विगृहीतो हि ज्यायसा हस्तिना पादयुद्धमिवाभ्युपैति" (अधि० ७. अध्या० ३)।

अभिप्लुतव्यपकर्षणमपवर्गः — "नित्यमासन्नमरिबलं वासयेदन्यत्राभ्यन्तरकोपशङ्कायाः" (अधि० ९. अध्या० २) इति।

परैरसमितः शब्दः स्वसंज्ञा — प्रथमा प्रकृतिस्तस्य भूम्यनन्तरा द्वितीया भूम्येकान्तरा तृतीया (अधि० ६. अध्या० २) इति।

प्रतिषेद्धव्यं वाक्यं पूर्वपक्षः — "स्वाम्यमात्यव्यसनयोरमात्यव्यसनं गरीयः" (अधि० ८. अध्या० १) इति।

तस्य निर्णयनवाक्यमुत्तरपक्षः — "तदायत्तत्वात्; तत्कूटस्थानीयो हि स्वामी" (अधि० ८. अध्या० १) इति।

सर्वत्रायत्तमेकान्तः — "तस्मादुत्थानमात्मनः कुर्वीत" (अधि० १. अध्या० १९) इति।

पश्चादेवं विहितमित्यनागतावेक्षणम् — "तुलाप्रतिमानं पौतवाध्यक्षे वक्ष्यामः" (अधि० २. अध्या० १३) इति।

उपमानमुपमानसचिवं निदर्शनमित्याह — दृष्टान्त इत्यादि। इहोदाहरणे गजरूपमुपमानं पदातिरूपोपमानसहितमुपात्तमिति बोद्धव्यम्।

कश्चिद् विधिमुत्सर्गेणाभितो व्यापकं कृत्वा व्याप्यत्वेनानिष्टाद् विषयादपोहनमपवर्ग इत्याह — अभिप्लुतेत्यादि। अभिप्लुतव्यपकर्षणम् अभिप्लुतस्य अभितः प्रसरतः व्यपकर्षणम्।

स्वसंज्ञामाह — परैरित्यादि। असमितः असङ्केतितः। इह प्रथमा प्रकृतिः द्वितीया तृतीयेति स्वपरिभाषिता संज्ञा।

पूर्वपक्षोत्तरपक्षयोर्लक्षणादिकं 'प्रतिषेद्धव्यं वाक्यम्' इत्येवमादि स्पष्टार्थम्।

एकान्तमाह — सर्वत्रेत्यादि। सर्वत्र आयत्तं देशकाले सर्वस्मिन्नव्यवर्ज्यं यत्, स एकान्तः। उदाहरणे उत्थानस्यैकान्तिकत्वं स्पष्टम्।

अनागतावेक्षणम् अतिक्रान्तावेक्षणं नियोगो विकल्पः समुच्चय इत्येतेषां विवरणवाक्यानि 'पश्चादेवम्' इत्यादीनि सुबोधानि।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पुरस्तादेवं विहितमित्यतिक्रान्तावेक्षणम् — "अमात्यसम्पदुक्ता पुरस्तात्"(अधि० ६. अध्या० १) इति ।

एवं नान्यथेति नियोगः—"तस्माद् धर्ममर्थं चास्योपदिशेन्नाधर्ममनर्थं च" (अधि० १. अध्या० १७) इति ।

अनेन वानेन वेति विकल्पः — "दुहितरो वा धर्मिष्ठेषु विवाहेषु जाताः" (अधि० ३. अध्या० ५) इति ।

अनेन चानेन चेति समुच्चयः — "स्वसञ्जातः पितृबन्धूनां च दायादः"(अधि० ३. अध्या० ७) इति ।

अनुक्तकरणमूह्यम् —"यथावद् दाता प्रतिग्रहीता च नोपहतौ स्यातां, तथानुशयं कुशलाः कल्पयेयुः"(अधि० ३. अध्या० १६) इति ॥

एवं शास्त्रमिदं युक्तमेताभिस्तन्त्रयुक्तिभिः ।
अवाप्तौ पालने चोक्तं लोकस्यास्य परस्य च ॥
धर्ममर्थं च कामं च प्रवर्तयति पाति च ।
अधर्मानर्थविद्वेषानिदं शास्त्रं निहन्ति च ॥

ऊह्यमाह— अनुक्तेत्यादि । अनुक्तस्य करणम् ऊहनम् । इहोदाहरणे 'यथावद्' इति पठ्यते । तेन तृतीयाधिकरणषोडशाध्यायस्थस्य 'यथा च दाता' इत्यस्य स्थाने 'यथावद् दाता' इत्यपि पाठसत्तानुमीयते । यथावदित्यस्य च यथेत्यर्थः ॥

इत्थं सपरिकरं शास्त्रार्थं परिसमाप्य तदध्ययनप्रयोजनानि श्लोकाभ्यां संगृह्णाति — एवं शास्त्रमित्यादि । अवाप्तौ योगे । पालने क्षेमे । अस्य लोकस्य ऐहलौकिकस्य पुरुषार्थस्य । परस्य पारलौकिकस्य । उभयलोकयोगक्षेमसाधकतां 'धर्ममर्थं च' इत्यादिश्लोकेन स्पष्टयति । तत्रार्थकामावैहलौकिकौ पुरुषार्थौ, धर्मः पारलौकिक इति विवेकः । ननु अस्मिन् शास्त्रे गूढपुरुषप्रणिधानादिभिरुपायैः परवञ्चनानि नानारूपाणि कर्तव्यतयोपदिश्यन्ते, उपांशुवधादीनि च परहिंसनानि; तत् कथमिदं धर्मस्य प्रवर्तकं पालकं च भवतीति चेद् , उच्यते — प्रजापरिरक्षणं हि नाम राज्ञो धर्मः । तच्च धर्मपरेण विजिगीषुणा सम्यङ् निर्वर्त्यमानं धर्मपरा अपि सामन्ताः शत्रूभूय रागवशादसहमानाश्च परभूमिकामुकाश्च विचित्रैः पापिष्ठोपायप्रयोगैर्विहन्तुं स्वभावात्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

येन शास्त्रं च शस्त्रं च नन्दराजगता च भूः।
अमर्षेणोद्धृतान्याशु तेन शास्त्रमिदं कृतम्॥

इति कौटलीयार्थशास्त्रे तन्त्रयुक्तौ पञ्चदशाधिकरणे प्रथमोऽध्यायः
तन्त्रयुक्तयः। आदितः पञ्चाशच्छततमोऽध्यायः।
एतावता कौटलियस्यार्थशास्त्रस्य तन्त्रयुक्तिः
पञ्चदशमधिकरणं समाप्तम्॥

दृष्ट्वा विप्रतिपत्तिं बहुधा शास्त्रेषु भाष्यकाराणाम्।
स्वयमेव विष्णुगुप्तश्चकार सूत्रं च भाष्यं च॥

